अ	घं	टा	क	र्णि	म	हा	वी	र	स	इ	व्या
लो	ह्ल.	र	पं	क्रि	भि	रो	गा	त्ता	त्र	द्र	धि
रव	ला	यं	श	क	नी	न्ह	त	वै	ता	ए	वि
हि	पा	स	पैं	ए	ड	स्व	ले	म्ब	ला	स्यं	ना
श	ज	ध	टा	क	र्णि	न	मो	स्तु	रा	नि	श
वे	ऐं	न	घं	ठः	ठः	ठः	स्तु	चो	प्र	वा	कः
दे	क	स्य	दौं	र	हा	क्षा	ते	र	ला	त	वि
ष्ट	ति	त	ह्रीं	वी	र	न	ॐ	भ	प्रा	पि	स्फो
ति	पां	एं	[illegible]	ही	जे	क्षि	ना	यं	भू	त	ट
त्वि	क्षि	र	म	है	का	[illegible]	नः	ति	वं	क	क
त्र	ना	यं	भ	ना	रा	त्र	त	ना	झं	पो	भ
य	ह	व	हा	म	दा	र	दा	र	रं	घो	यं

[illegible] मा [illegible] स्र [illegible]

अथ [illegible] गाव [illegible]

[illegible] स [illegible] मान [illegible]

म [illegible] स्त [illegible] मा [illegible] ते [illegible] स [illegible] ति [illegible]

[illegible] ते त [illegible] गती [illegible] ग ति [illegible]

[illegible] ते [illegible] श्री [illegible] ते

[illegible] प [illegible] ते ल [illegible] ते घ [illegible]

[illegible] ते [illegible] मधि त

[illegible]





ॐ स्वस्ति श्रीगणेशाय नमः ॥ ॐ अस्य श्री सप्तशती
का प्रथम चरित्रस्य ॥ ब्रह्मा ऋषिर्गायत्री छंदे महाका
ली देवता ॥ नंदा शक्तिः ॥ रक्तदंतिका बीजं ॥ अग्निस्तत्वं
महाकाली प्रीत्यर्थे प्रथम चरित्र जपे विनियोगः ॥ अ
थ ध्यानं ॥ ॐ खड्गं चक्र गदेषु चापपरिघाञ्छूलं भुशुं
डी शिरः ॥ शंखं संदधतीं करैस्त्रिनयनां सर्वांग भूषा
वृतां ॥ याम स्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभं
नीलाश्म द्युति मास्य पाद दशकां वंदे महाकालिकां
इति ध्यानं ॥ ॐ नमः चंडिकायै ॥ मार्कंडेय उवाच ॥

ॐ नमः ॥ सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥
निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ १ ॥ महामाया
नुभावेन यथा मन्वंतराधिपः ॥ स बभूव महाभाग
सावर्णिस्तनयो रवेः ॥ २ ॥ स्वारोचिषेंतरे पूर्वं चैत्रवंश
समुद्भवः ॥ सुरथो नाम राजाभूत्समस्ते क्षितिमंडले
तस्य पालयतः सम्यक्प्रजाः पुत्रानिवौरसान् ॥ बभू
वुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥ ४ ॥ तस्यापै
रभवद्युद्धमतिप्रबलदंडिनः ॥ न्यूनैरपि स तै युद्धे को
लाविध्वंसिभिर्जितः ॥ ५ ॥ ततः स पुरमायातो निजदे

५ः
२

स्याधिपोभवत्॥ आक्रांतः समहाभागस्तैस्तदाप्रब
लारिभिः॥ ५॥ अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्म
भिः॥ कोशोबलंचापहृतंतत्रापिस्वपुरेततः॥ ६॥ त
तोमृगयाव्याजेनहृतस्वाम्यः सभूपतिः॥ एकाकी
हयमारुह्यजगामगहनंवनं॥ ७॥ सतत्राश्रममद्रा
क्षीद्द्विजवर्यस्यमेधसः॥ प्रशांतश्वापदाकीर्णंमुनि
शिष्योपशोभितं॥ ८॥ तस्थौकंचित्सकालंचमुनि
नातेनसत्कृतः॥ इतश्चेतश्चविचरंस्तस्मिन्मुनिव
राश्रमे॥ ९॥ सोचिंतयत्तदातत्रममत्वाकृष्टचेतन

२

मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥११॥ मद्भृ
त्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥ न जाने स प्रधानो
मे शूरो हस्ती सदामदः ॥ १२ ॥ मम वैरिवशं यातः का
न् भोगानुपलप्स्यते ॥ ये ममानुगता नित्यं प्रसादधन
भोजनैः ॥ १३ ॥ अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृतां
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययं ॥ १४ ॥ सं
चितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ॥ एतच्चान्य
च्च सततं चिंतयामास पार्थिवः ॥ १५ ॥ तत्र विप्राश्रमा
भ्यासे वैश्यमेकं ददर्श सः ॥ स पृष्टस्तेन कस्त्वं भो हेतु

श्चागमनेत्रकः ॥१५॥ सशोकइवकस्मात्वंदुर्मनाइव
लक्ष्यसे ॥ इत्याकर्ण्यवचस्तस्यभूपतेःप्रणयोदितं
७ ॥ प्रत्युवाचसतंवैश्यःप्रश्रयावनतोनृपं ॥ वैश्यउ
वाच ॥ समाधिर्नामवैश्योहमुत्पन्नोधनिनांकुले
१८ ॥ पुत्रदारैर्निरस्तश्चधनलोभादसाधुभिः ॥ वि
हीनश्चधनैर्दारैःपुत्रैरादायमेधनं ॥ १९ ॥ वनमभ्या
गतोदुःखीनिरस्तश्चाप्तबंधुभिः ॥ सोहंनवेद्मिपुत्रा
णांकुशलाकुशलात्मिकां ॥ २० ॥ प्रवृत्तिंस्वजनानां
चदाराणांचात्रसंस्थितः ॥ किंनुतेषांगृहेक्षेमम

क्षेमं किंन्वसौ वृतं ॥४१॥ कथं ते किं नु सद्वृत्ता दुर्वृत्ताः
किं नु मे सुता ॥ राजोवाच ॥ यैर्निरस्तो भवांल्लुब्धैः पुत्र
दारादिभिर्धनैः ॥४२॥ तेषु किं भवतः स्नेहमनुबध्ना
ति मानसं ॥ वैश्य उवाच ॥ एवमेतद्यथा प्राह भवान
स्मद्गतं वचः ॥४३॥ किं करोमि न बध्नाति मम निष्ठु
रतां मनः ॥ यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृ
तः ॥४४॥ पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ॥ कि
मेतन्नाभिजानामि जानन्नपि महामते ॥४५॥ यत्प्रेम
प्रवणं चित्तं विगुणेष्वपि बंधुषु ॥ तेषां कृते मे निः

५
८

स्वासो दौर्मनस्पं च जायते ॥२४॥ करोमि किं यन्न मनस्ते
ष्वप्रीतिषु निष्ठुरं ॥मार्कंडेय उवाच॥ ततस्तौ सहितौ वि
प्रतं मुनिं समुपस्थितौ ॥२५॥ समाधिर्नाम वैश्योसौ स
च पार्थिव सत्तमः ॥ कृत्वा तु तौ यथान्यायं यथार्हं तेन
संविदं ॥२७॥ उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्य पार्थि
वौ ॥राजोवाच॥ भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं
वदस्व तत् ॥२८॥ दुःखाय यन्मे मनसः स्वचित्ताय
त्ततां विना ॥ ममत्वं गतराज्यस्य राज्यांगेष्वखिलेष्व
पि ॥२९॥ जानतोपि यथाज्ञस्य किमेतन्मुनिसत्तमः

८

अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥३१॥ स्व
जनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ॥ एवमेष त
थाहं च द्वावप्यत्यंतदुःखितौ ॥३२॥ दृष्टदोषेपि वि
षये ममत्वाकृष्टमानसौ ॥ तत्किमेतन्महाभाग य
न्मोहो ज्ञानिनोरपि ॥३३॥ ममास्य च भवत्येषा विवे
कांधस्य मूढता ॥ ऋषिरुवाच ॥ ज्ञानमस्ति समस्तस्य
जंतोर्विषयगोचरे ॥३४॥ विषयश्च महाभाग याति
चैवं पृथक् पृथक् ॥ दिवांधाः प्राणिनः केचिद्रात्रावं
धास्तथापरे ॥३५॥ केचिद्दिवा तथा रात्रौ प्राणिनस्तु

उः
५

ल्पं दृष्टवपः ॥ ज्ञानिनो मनुजास्त्वं किं न तेन हि केवलं ॥३६॥
यतो हि ज्ञानिनः सर्वे पक्ष्यादिमृगादयः ॥ ज्ञानं च तन्म
नुष्याणां यत्तेषां मृगपक्षिणां ॥३७॥ मनुष्याणां च यत्तेषां
तुल्यमन्यत्तयोर्मयोः ॥ ज्ञानेऽपि सति पश्यैतान्पतगान्मर्द्धि
वचंचुषु ॥३८॥ कणमोहाहतान्मोहात्सीप्रमाना नपिद
भा ॥ मेनुष्यामनुजे व्याघ्रसामिलां बा सुतान्स्त्रति ॥३९॥
लोभात्स्त्रतुपकारायन्न्वेतेः किं न पश्यसि तथापि म
नुता वैरमोहमैत्रेलिपातिताः ॥४०॥ महामायाप्रभावेन
संसारस्थितिकारिणः ॥ तन्नात्र विस्मयः कार्यो योगनि

द्राजगत्पतेः ॥४१॥ महामायाहरेश्चैषातयासंमोह्यतेज
गत् ॥ ज्ञानिनामपिचेतांसिदेवीभगवतीहिसा ॥४२॥
बलादाकृष्यमोहायमहामायाप्रयच्छति ॥ तयावि
सृज्यतेविश्वंजगदेतच्चराचरं ॥४३॥ सैषाप्रसन्नाव
रदानृणांभवतिमुक्तये ॥ साविद्यापरमामुक्तेर्हेतुभू
तासनातनी ॥४४॥ संसारबंधहेतुश्चसैवसर्वेश्वरे
श्वरी ॥ राजोवाच ॥ भगवनकाहिसादेवीमहामायेति
यांभवान ॥४५॥ ब्रवीतिकथमुत्पन्नासाकर्मास्याश्च
किंद्विज ॥ यत्स्वभावाचसादेवीयत्स्वरूपायदुद्भवा ॥४६॥

तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ ऋषिरुवाच
नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततं ॥४७॥ तथापि
तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥ देवानां कार्यसिद्ध्य
र्थमाविर्भवति सा यदा ॥४८॥ उत्पन्नेति तदा लोके सा
नित्याप्यभिधीयते ॥ योगनिद्रां यदा विष्णुर्जगत्येक व४
र्णवीकृते ॥४९॥ आस्तीर्य शेषमभजत्कल्पान्ते भग
वान्प्रभुः ॥ तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ
५० ॥ विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥ स ना
भिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥५१॥ दृष्ट्वा

तावसरौचोग्रौप्रसंतंचजनार्दनं ॥ तुष्टाववोगनिद्रां
तामेकाग्रहृदयस्थितः ॥ ५२ ॥ विवोधनार्थायहरेर्हरि
नेत्रकृतालयां ॥ विश्वेश्वरींजगद्धात्रींस्थितिसंहार
कारणीं ॥ ५३ ॥ निद्रांभगवतींविष्णोरतुलांतेजसःप्र
भुः ॥ ब्रह्मोवाच ॥ त्वंस्वाहात्वंस्वधात्वंहिवषट्कारस्वरा
त्मिका ॥ ५४ ॥ स्वधात्वमक्षरेनित्येत्रिधामात्रात्मिका
स्थिता ॥ अर्धमात्रास्थितानित्यायानुच्चार्याविशेष
तः ॥ ५५ ॥ त्वमेवसात्वंसावित्रीत्वंदेवीजननीपरा ॥
त्वयैतद्धार्यतेविश्वंत्वयैतत्सृज्यतेजगत ॥ ५६ ॥ त्वयैत

सात्यतेदेवित्वमत्स्यंतेचसर्वदा॥ विसृष्टौसृष्टिरू
पात्वंस्थितिरूपाचपालने॥५७॥ तथासंहृतिरू
पांतेजगतोस्यजगन्मये॥ महाविद्यामहामायाम
हामेधामहास्मृतिः॥५८॥ महामोहाचभवतीमहा
देवीमहासुरी॥ प्रकृतिस्त्वंचसर्वस्यगुणत्रयविभा
विनी॥५९॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्चदारु
णा॥ त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वंबुद्धिर्बोधलक्षणा
॥ लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिःक्षांतिरेवच॥
खड्गनीशूलनीघोरागदिनीचक्रिणीतथा॥६०॥

शंखिनी चापिनी वाणभुसुंडी परिघायुधा ॥ सौम्या
सौम्यतराशेष सौम्येभ्यस्त्वतिसुंदरी ॥८२॥ परापरा
णां परमा त्वमेव परमेश्वरी ॥ यच्च किंचिद्वस्तु सद [क्वचि]
सद्वाखिलात्मिके ॥८३॥ तस्य सर्वस्य या शक्तिः सा
त्वं किं स्तूयसे तदा ॥ यया त्वया जगत्स्रष्टा जगत्पात्ता
त्ति यो जगत ॥८४॥ सोपि निद्रावशं नीतः कस्त्वां स्तोतु
मिहेश्वरः ॥ विष्णुः शरीरग्रहणमहमीशान एव च
८५ ॥ कारितास्ते यतोतस्त्वां कः स्तोतुं शक्तिमान भ
वेत ॥ सात्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥८६

दु॰
८

मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ प्रबोधं च जग
त्स्वामी नीयतामच्युतो लघुः ॥ ६७ ॥ बोधश्च क्रियता
मस्य हंतुमेतौ महासुरौ ॥ ऋषिरुवाच ॥ एवं स्तुता तद
देवी तामसी तत्र वेधसा ॥ ६८ ॥ विष्णोः प्रबोधना
र्थाय निहंतुं मधुकैटभौ ॥ नेत्रास्यनासिकाबाहुहृद
येभ्यस्तथोरसः ॥ ६९ ॥ निर्गम्य दर्शने तस्थौ ब्रह्मणो
ऽव्यक्तजन्मनः ॥ उत्तस्थौ च जगन्नाथस्तया मुक्तो जना
र्दनः ॥ ७० ॥ एकार्णवेऽहिशयनात्ततः स ददृशे च तौ ॥
मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥ ७१ ॥ क्रो

धरक्तेक्षणावत्तुं व्रह्माणं जनितोद्यमौ ॥ समुत्थाय
तत स्ताभ्यां युयुधे भगवान्हरि ॥ ७२ ॥ पंचवर्षसह
स्राणि वाहुप्रहरणो विभुः ॥ तावप्यतिबलोन्मत्तौ म
हामायाविमोहितौ ॥ ७३ ॥ उक्तवंतौ वरोस्मत्तो व्रिय
तामिति केशवं ॥ भगवानुवाच ॥ भवेतामद्य मे
तुष्टौ मम वध्यावुभावपि ॥ ७४ ॥ किमन्येन वरेणा
त्र एतावद्धि वृतं मम ॥ ऋषिरुवाच ॥ वंचिताभ्यामि
ति तदा सर्वमापोमयं जगत ॥ ७५ ॥ विलोक्य ताभ्यां
गदितो भगवान्कमलेक्षणः ॥ आवां जहि न यत्रोर्वी

सलिलेनपरिप्लुता ॥७६॥ ऋषिरुवाच ॥ तथेत्युक्त्वाभ
गवता शंखचक्रगदाभृता ॥ कृत्वाचक्रेण वैछिन्ने
जघने शिरसीतयो ॥७७॥ एवमेषासमुत्पन्नाब्रह्म
णासंस्तुता स्वयं ॥ प्रभावमस्यादेव्यास्तुभूयः शृणु
वदामिते ॥७८॥ इतिमार्कंडेयपुराणे सावर्णिकेमन्वं
तरे देवीमाहात्म्येमधुकैटभवधः ॥ १ ॥ ॐ अस्य श्री
सप्तशतिकायाम मध्यमचरित्रस्य विष्णुरृषिरुष्णि-
क् छंदो ॥ महालक्ष्मीर्देवता ॥ शाकंभरी शक्तिः ॥ दुर्गा
बीजं ॥ वायुस्तत्त्वं महालक्ष्मीप्रीत्यर्थे मध्यमचरि

२२

ऋजेषविनियोगः॥अथध्यानं॥ॐअक्षस्रक्परशुं
गदेषुः कुलिशंपद्मंधनुः कुंडिकां॥दंडंशक्तिमसिं
चचर्मजलजंघंटांसुराभाजनं॥शूलंपाशसुदर्श
नेचदधतींहस्तैःप्रवालप्रभांसेवेसैरिभमर्दिनी
मिहमहालक्ष्मींसरोजस्थितां॥इतिध्यानं॥ऋषिरु
वाच॥देवासुरमभूद्युद्धंपूर्णमब्दशतंपुरा॥महि
षेसुराणामधिपेदेवानांचपुरंदरे॥१॥तत्रासुरैर्महा
वीर्यैर्देवसैन्यंपराजितं॥जित्वाचसकलान्देवा
न्इंद्रोभून्महिषासुरः॥२॥ततःपराजितादेवाःपद्म

योनिं प्रजापतिं ॥ पुरस्कृत्य गतास्तत्र यत्रेशो गरुडध्वजो
३ ॥ यथावृत्तं तेन योक्तं दक्षकन्याकिबासरचेष्टितं ॥ त्रिदशाः
कथयामासुर्देवाभिभव विस्तरं ॥ ४ ॥ सूर्येन्द्राग्न्यम्बनि
लेंदुनां यमस्य वरुणस्य च ॥ अन्येषां चाधिकृपान्स्व
यमेवाधितिष्ठति ॥ ५ ॥ स्वर्गान्निराकृताः सर्वे तेन देव
गणा भुवि ॥ विचरंति यथा मर्त्या महिषेण दुरात्मना
६ ॥ एतद्वः कथितं सर्वं ममरारिविचेष्टितं ॥ शरणं च प्र
पन्नाः स्मो वधस्तस्य विचिंत्यतां ॥ ७ ॥ इत्थं निशम्य देव
नां वचांसि मधुसूदनः ॥ चकार कोपं शंभुश्च भ्रुकुटीकु द२

टलाननौ ॥८॥ ततोतिकोपपूर्णस्य चक्रिणो वदनात्त
तः॥ निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ॥९॥ अन्ये
षां चैव देवानां शक्रादीनां शरीरतः॥ निर्गतं सुमहत्ते
जस्तच्चैक्यं समगच्छत ॥१०॥ अतीव तेजसः कूटं ज्वलंत
मिव पर्वतं॥ ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरं
॥११॥ अतुलं तत्र तत्तेजः सर्वदेवशरीरजं॥ एकस्थं तदभू
न्नारी व्याप्तलोकत्रयं त्विषा ॥१२॥ यदभूच्छांभवं तेजस्ते
नाजायत तन्मुखं॥ याम्येन चाभवन्केशा बाहवो विष्णु मा॰ २
तेजसा ॥१३॥ सौम्येन स्तनयोर्युग्मं मध्यं चैंद्रेण चाभ

वत || वारुणेन च जंघोरु नितंबस्तेजसा भुवः || १४ || ब्र
ह्मणस्तेजसा पादौ तदंगुल्योर्कतेजसा || वसूनां च
करांगुल्यः कौवेरेण च नासिका || १५ || तस्यास्तु दंता
संभूताः प्राजापत्येन तेजसा || नयनत्रितयं जज्ञे तथा
पावकतेजसा || १६ || भ्रुवौ च संध्ययोस्तेजः श्रवणा
वनिलस्य च || अन्येषां चैव देवानां संभवस्तेजसां
शिवा || १७ || ततः समस्तदेवानां तेजोराशिसमुद्भवां ||
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः || १८ || शूलं
शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक || चक्रं च

दत्तेवान्कृष्णः समुत्पाद्य स्वचक्रतः ॥१८॥ शंखंच
वरुणः शक्तिंददौतस्यैहुताशनः ॥ मारुतोदत्तवांश्चा
पंबाणपूर्णेतथेषुधी ॥१९॥ वज्रमिंद्रः समुत्पाद्य
कुलिशादमराधिपः ॥ ददौतस्यैसहस्राक्षो घंटामै
रावताद्गजात ॥२०॥ कालदंडाद्यमोदंडं पाशंचांबु
पतिर्ददौ ॥ प्रजापतिश्चाक्षमालांददौब्रह्माकमंड
लुं ॥२१॥ समस्तरोमकूपेषुनिजरश्मीन्दिवाकरः ॥
कालश्चदत्तवान्खड्गंतस्यश्चर्मचनिर्मलं ॥२२॥
क्षीरोदश्चामलंहारमजरेचतथांबरे ॥ चूडामणिं

तथादिव्यंकुंडलेकटकानिच ॥ २४ ॥ अर्द्धचंद्रंतथा
श्वेतंकेयूरान्सर्वबाहुषु ॥ नूपुरौविमलौतद्वद्ग्रैवे
यकमनुत्तमं ॥ २५ ॥ अंगुलीयकरत्नानिसमस्ता
स्वंगुलीषुच ॥ विश्वकर्माददौतस्यैपरशुंचातिनि
र्मलं ॥ २६ ॥ अस्त्राण्यनेकरूपाणितथाभेद्यंचदंश
नं ॥ अम्लानपंकजांमालांशिरस्युरसिचापरां ॥ अ
अदद्ज्जलधिस्तस्यैपंकजंचातिशोभनं ॥ हिमवा
न्वाहनंसिंहंरत्नानिविविधानिच ॥ २७ ॥ ददावशून्यं
सुरयापानपात्रंधनाधिपः ॥ शेषश्चसर्वनागेशो

महामणिविभ्राजिते ॥ २९ ॥ नागहर्यंदद्वौ तु स्थपते यः
पापविनाशनौ ॥ कुबेरस्य सुरेन्द्र देवी मणिकौ राधुपेत्त
या ॥ ३० ॥ संमानिता जनादौ च्चैः साष्टरूसंमयूरमृडः ॥ त
स्या नादे नघोरेण कल्पमा पारते नेभः ॥ ३१ ॥ [redacted] मा
यतानि महत्ताप्रतिशब्दो महानभत ॥ चंद्रमः सक
ला लोकाः समुद्रश्च चकंपिरे ॥ ३२ ॥ चचाल च वसुं
धेलुं सकलाश्च महीधराः ॥ जेयेत्ति देवाश्च ये दत्ताम
कः सिंहवाहिनी ॥ ३३ ॥ तदृष्टुर्मुनय यैवनां महिलिनग्ना
लमकृत्तयः ॥ इत्कामसमतोसंहत घंटै लोक्यममराश्यः

३४॥सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः॥आः
किमेतदिति क्रोधादाभाष्य महिषासुरः॥३५॥अभ्यधा
वत तं शब्दमशेषैरसुरैर्वृतः॥स ददर्श ततो देवीं व्याप्त
लोकत्रयं त्विषा॥३६॥पादाक्रान्त्या नतभुवं किरीटो
ल्लिखितांबरां॥क्षोभिताशेषपातालां धनुर्ज्यानि
स्वनेन तां॥३७॥दिशो भुजसहस्रेण समंताद्व्याप्य
संस्थितां॥ततः प्रववृते युद्धं तया देव्या सुरद्विषां
३८॥शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगंतरं॥म
हिषासुरसेनानीश्चिक्षुराख्यो महासुरः॥३९॥युयु

ये चामरस्यान्यैश्चतरंगवलान्वितः ॥ रथानामयु
तैः पङ्क्तिरुदग्रारथ्यो महासुरः ॥ ४० ॥ अयुध्यतायुतान
च सहस्रेण महाहनुः ॥ पंचाशाद्भिश्चानियुतैरसिलो
मा महासुरः ॥ ४१ ॥ अयुतानां शतैः पङ्क्तिर्वाष्कलो युयु
धे रणे ॥ गजवाजिसहस्रौघैरनेकैः परिवारितः ॥ ४२ ॥
वृतो रथानां कोट्या च युक्तस्तस्मिन्नयुध्यत ॥ विडालो
रथ्यायुतानां च पंचाशाद्भिरथायुतैः ॥ ४३ ॥ अयुध्यत संयु
गे तत्र रथानां परिवारितः ॥ अन्ये च तत्रायुतशो र
थनागहयैर्वृताः ॥ ४४ ॥ युयुधुः संयुगे देव्या सह तत्र

२५

मलसराः॥ कोटिकोटिसहस्रैस्तु रथानां दंतिनां त
था॥४५॥ हयानांच वृतो युद्धे तत्राभून्महिषासुरः
तोमरैर्भिंदिपालैश्च शक्तिभिर्मुशलैस्तथा॥४६॥ यु
युधुः संयुगे देव्या खड्गैः परशुपट्टिशैः॥ केचिच्च चिक्षि
पुः शक्तीः केचित्पाशांस्तथापरे॥४७॥ देवीं खड्गप्र
हारैस्तु ते तां हंतुं प्रचक्रमुः॥ सापि देवी ततस्तानि
शस्त्राण्यस्त्राणि चंडिका॥४८॥ लीलयैव प्रचिच्छे
द निजशस्त्रास्त्रवर्षिणी॥ अनायस्तानना देवी
स्तूयमाना सुरर्षिभिः॥४९॥ मुमोचासुरदेहेषु

२५

स्त्राणप स्त्राणि चेश्वरी॥ सोपिक्रुद्धोधुतसटोदे
व्यावाहनकेशरी॥५०॥चचारासुरसैन्येषु वनेष्वि
वहुताशनः॥ निःश्वासान्मुमुचे यांश्च युध्यमा
नारणेंविका॥५१॥तएवसद्यःसंभूतागणाःशत
सहस्रशः॥युयुधुस्तेपरशुभिर्भिंदिपालासिपट्टिशैः
॥५२॥नाशयंतोसुरगणान्देवीशक्त्युपबृंहिताः॥अ
वादयंतपटहान्गणाःशंखांस्तथापरे॥५३॥मृदं
गांश्चतथैवान्येतस्मिन्युद्धमहोत्सवे॥ततोदेवीत्रि
शूलेनगदयाशक्तिवृष्टिभिः॥५४॥खड्गादिभिश्च

दु॰
२५

तरोनिजघानमहासुरान्॥पातयामासचैवान्यान्
घंटास्वनविमोहितान्॥५५॥असुरान्भुविपाशेनवध्
चान्यानकर्षयत्॥केचिद्द्विधाकृतास्तीक्ष्णैःखड्गपा
तैस्तथापरे॥५६॥विपोथितानिपातेनगदयाभुवि धौ
शेरते॥वेमुश्चकेचिद्रुधिरंमुसलेनभृशंहताः॥५७॥
केचिन्निपतिताभूमौभिन्नाःशूलेनवक्षसि॥निरं
तराःशरौघेणकृताकेचिद्रणाजिरे॥५८॥सेनानुका
रिणःप्राणान्मुमुचुस्त्रिदशार्दनाः॥केषांचिद्वाह
वश्छिन्नाश्छिन्नग्रीवास्तथापरे॥५९॥शिरांसिपे

नुरन्येषामन्येमध्येविदारिताः ॥ विछिन्नजंघास्त्व
परेपेतुरुर्व्यांमहासुराः ॥ ६० ॥ एकबाहुक्षिचरणाः केचि
द्देव्याद्विधाकृताः ॥ छिन्नेपिचान्येशिरसिपतिताः पु
नरुत्थिताः ॥ ६१ ॥ कवंधायुयुधुर्देव्यागृहीतपरमायु
धाः ॥ ननृतुश्चापरेतत्रयुद्धेतूर्यलयाश्रिताः ॥ ६२ ॥ क
वंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ॥ तिष्ठति
ष्ठेतिभाषंतोदेवीमन्येमहासुराः ॥ ६३ ॥ पातितैरथ
नागाश्वैरसुरैश्चवसुंधरा ॥ अगम्यासाभवत्तत्रयत्रा
भूत्समहारणः ॥ ६४ ॥ शोणितौघामहानद्यः सद्यस्त

दु
१६

त्रा विसुस्रुवुः ॥ मध्येचासुरसैन्यस्यवारणासुरवाजि
नां ॥ ६५ ॥ क्षणेनतन्महासैन्यमसुराणांतथांबिकां
निन्येक्षयंयथावह्निस्तृणदारुमहाचयं ॥ ६६ ॥ सच
सिंहोमहानादमुत्सृजन्धुतकेसरः ॥ शरीरेभ्योमरारी
णामसूनिवविचिन्वति ॥ ६७ ॥ देव्यागणैश्चतैस्तत्र
कृतंयुद्धंतथासुरैः ॥ यथैषांतुष्टुवुर्देवाःपुष्पवृष्टिमु
चोदिवि ॥ ६८ ॥ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरे
देवीमाहात्म्येमहिषासुरसैन्यवधः ॥ २ ॥ ऋषिरुवाच
निहन्यमानंतत्सैन्यमवलोक्यमहासुरः ॥ सेनानि

१६

श्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकां ॥ १ ॥ स देवीं शर
वर्षेण ववर्ष समरेऽसुरः ॥ यथा मेरुगिरेः शृंगं तोयवर्षेण
तोयदः ॥ २ ॥ तस्य छित्वा ततो देवी लीलयैव शरोत्करान्
जघान तुरगान्बाणैर्यंतारं चैव वाजिनां ॥ ३ ॥ चिच्छेद च
धनुः सद्यो ध्वजं चातिसमुच्छ्रितं ॥ विव्याध चैव गात्रे
षु छिन्नधन्वानमाशुगैः ॥ ४ ॥ सच्छिन्नधन्वा विरथो ह
ताश्वो हतसारथिः ॥ अभ्यधावत तां देवीं खड्गचर्मधरो
सुरः ॥ ५ ॥ सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ॥ आ
जघान भुजे सव्ये देवीमप्यतिवेगवान् ॥ ६ ॥ तस्याः खड्गो

भुजेंप्राप्यपफालनृपनंदन॥ततोजग्राहशूलंस
कोपादरुणलोचनः॥ ७ ॥चिक्षेपचततस्ततुभद्र
काल्यांमहासुरः॥जाज्वल्यमानंतेजोभीरविबिंब
मिवांबरात्॥ ८ ॥दृष्ट्वातदापतच्छूलंदेवीशूलममुं
चत॥तच्छूलंशतधातेननीतंसचमहासुरः॥ ९ ॥हते
तस्मिन्महावीर्येमहिषस्यचमूपतौ॥आजगामग
जारूढश्चामरस्त्रिदशार्दनः॥ १० ॥सोपिशक्तिंमुमो
चाथदेव्यास्तामंबिकाद्रुतं॥हुंकाराभिहतांभूमौपा
तयामासनिःप्रभां॥ ११ ॥भग्नांशक्तिंनिपतितांदृष्ट्वाक्रो

यसमन्वितः॥ चिक्षेप चामरः शूलं बाणैस्तदपि सा॥
२८ च्छिनत्॥१२॥ततः सिंहः समुत्पत्य गजकुंभांतरस्थितः
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा॥१३॥युध्यमा
नौ ततस्तौ तु तस्मान्नागान्महीं गतौ॥ युयुधातेतिसंर
ब्धौ प्रहारैरतिदारुणैः॥१४॥ततो वेगात्खमुत्पत्य नि प
पत्य च मृगारिणा॥ करप्रहारेण शिरश्चामरस्य पृथ
कृतं॥१५॥उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः
दंतमुष्टितलैश्चैव करालश्च निपातितः॥१६॥देवीक्रु
द्धा गदापातैश्चूर्णयामास चोद्धतं॥बाष्कलं भिंदिपालेन दि

ऽ॰
१८

नवाग्ने स्ताम्रं तथ्यंच के ॥ १७ ॥ उग्राल्पमुग्रवीर्यं च तथैव
च महाफलं ॥ त्रिवेत्राचत्रिमूलेन जपानपरमेश्वरी
१८ ॥ विडालस्यापि नाकापास्यान्त यामा सवैष्णर: ॥ ऽ
धोरैरु भैरव चाणौ शारे निम्नेय पमन्हयं ॥ १९ ॥ एवं संहा
यमाग्ने न स्वेसेन्ये [illegible] मस्ति षालर: ॥ माफवेलम्
रूपेण त्रासयामा [illegible] सतानगणान् ॥ २० ॥ कोपि
तेऽउ प्रहारेण रवुरुद्धपैत्तिया परान् ॥ लाग लेताउ
तांग्रमन्यां शिंगा भ्यां चाविदारितान् ॥ २१ ॥ केनेनको न
प्यपदपरान्जादेन भ्रमरोनच ॥ नः स्वासपवनेना

१८

न्यान्पातयामासभूतले ॥ २२ ॥ निपात्यप्रमथानी॰
कमभ्यधावतसोसुरः ॥ सिंहंहंतुंमहादेव्याः कोपं
चक्रेततोंबिका ॥ २३ ॥ सोपिकोपान्महावीर्यः खुर
क्षुण्णमहीतलः ॥ शृंगाभ्यांपर्वतानुच्चांश्चिक्षेपचन
नादच ॥ २४ ॥ वेगभ्रमणविक्षुण्णामहीतस्यव्यशी
र्यत ॥ लांगूलेनाहतश्चाब्धिः प्लावयामाससर्व
तः ॥ २५ ॥ धुतशृंगविभिन्नाश्चखंडंखंडंययुर्घनाः
श्वासानिलास्ताः शतशोनिपेतुर्नभसोचलाः ॥ २६
इतिक्रोधसमाध्मातमापतंतंमहासुरं ॥ दृष्ट्वासाचं

दु॰
१९
ऽकाकोपंतत्क्षयायतदाकरोत ॥ ७ ॥ साक्षिप्त्वातस्य
वैपाशंतंववंधमहासुरं ॥ तत्याजमाहिषंरूपंसो
पिवद्धोमहामृधे ॥ ८ ॥ ततःसिंहोभवत्सद्योयावत
स्यांविकाशिरः ॥ छिंनतितावत्पुरुषःखड्गपाणिर
दृश्यत ॥ ९ ॥ ततएवासुपुरुषंदेवीचिछेदसायकै
स्तंखड्गचर्मणासार्द्धंततःसोभून्महागजः ॥ करेण
चमहासिंहंतंचकर्षजगर्जच ॥ कर्षतस्तुकरंदेवी
खड्गेननिरकृंतत ॥ १० ॥ ततोमहासुरोभूयोमाहि
षंवपुरास्थितः ॥ तथैवक्षोभयामासत्रैलोक्यंस १९

चराचरं ॥३२॥ ततः क्रुद्धा जगन्माता चंडिकापानमुत्त
मं ॥ पपौ पुनः पुनश्चैव जहासारुणलोचना ॥३३॥ न
नर्द चासुरः सोपि बलवीर्यमदोद्धतः ॥ विषाणाभ्यां
च चिक्षेप चंडिकां प्रति भूधरान् ॥३४॥ सा च तान्प्रहि
तांस्तेन चूर्णयंती शरोत्करैः ॥ उवाच तं मदोद्धूतमुख
ग रागाकुलाक्षरं ॥३५॥ देव्युवाच ॥ गर्ज गर्ज क्षणं मूढ
मधु यावत्पिबाम्यहं ॥ मया त्वयि हतेत्रैव गर्जिष्यंत्या
शु देवता ॥३६॥ ऋषिरुवाच ॥ एवमुक्त्वा समुत्पत्य सा
रूढा तं महासुरं ॥ पादेनाक्रम्य कंठे च शूलेनैनमता

दु
२·

डयत् ॥ ३७ ॥ ततः सोपि पदाक्रांतस्तया निजमुखात्ततः
अर्धनिष्क्रांत एवाति देव्या वीर्येण संवृतः ॥ ३८ ॥ अर्धनि
ष्क्रांत एवासौ युध्यमानो महासुरः ॥ तया महासिना दे
व्या शिरश्छित्वा निपातितः ॥ ३९ ॥ ततो हाहाकृतं सर्वं दै
त्यसैन्यं ननाश तत् ॥ प्रहर्षं च परं जग्मुः सकला देवता
गणाः ॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ॥ जगुर्गं
धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४१ ॥ इति मार्कंडेयपु
राणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरवधः
३ ॥ ऋषिरुवाच ॥ शक्रादयः सुरगणा निहतेतिवीर्ये

दु
२०

तस्मिन्दुरात्मनिसुरारिवलेचदेव्या ॥ तांतुष्टुवुःप्रणति
नम्रशिरोधरांसावाग्भिःप्रहृष्टपुलकोद्गमचारुदेहा
॥ देव्याययाततमिदंजगदात्मशक्त्यानिःशेषदेवगण
शक्तिसमूहमूर्त्या ॥ तामंविकामखिलदेवमहर्षिपू
ज्यांभक्त्यानताःस्मविदधातुशुभानिसानः ॥ २ ॥ यस्याः
प्रभावमतुलंभगवाननंतोब्रह्माहरश्चनहिवक्तुम
लंवलंच ॥ साचंडिकाखिलजगत्परिपालनायना
शायचाशुभभयस्यमतिंकरोतु ॥ ३ ॥ याश्रीःस्वयंसु
कृतिनांभवनेष्वलक्ष्मीःपापात्मनांकृतधियांहृदये

३
२

बुद्धिः ॥ श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः
स्म परिपालय देवि विश्वं ॥ ४ ॥ किं वर्णयाम तव रूप
मचिंत्यमेतत् किं चातिवीर्यमसुरक्षयकारि भूरि ॥ किं
चाहवेषु चरितानि तवाति यानि सर्वेषु देव्यसुरदेव
गणादिकेषु ॥ ५ ॥ हेतुः समस्तजगतां त्रिगुणापि दो
षैर्न ज्ञायसे हरिहरादिभिरप्यपारा ॥ सर्वाश्रयाखि
लमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्व
माद्या ॥ ६ ॥ यस्याः समस्तसुरता समुदीरणेन तृप्तिं
प्रयाति सकलेषु मखेषु देवि ॥ स्वाहासि वै पितृगण

स्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैः स्वधाच ॥ ७ ॥
यामुक्तिहेतुरविचिंत्यमहाव्रताच ॥ अभ्यस्यसेसुनि
यतेंद्रियतत्वसारैः ॥ मोक्षार्थिभिर्मुनिगिरस्तसमस्त
दोषैर्विद्यासिसाभगवतीपरमाहिदेवि ॥ ८ ॥ शब्दात्मि
कासुविमलर्ग्यजुषांनिधानमुद्गीथरम्यपदपाठव
तांचसाम्नां ॥ देवीत्रयीभगवतीभवभावनायवार्त्ता
चसर्वजगतांपरमार्त्तिहंत्री ॥ ९ ॥ मेधासिदेविविदिता
खिलशास्त्रसारादुर्गासिदुर्गभवसागरनौरसंगा ॥
श्रीः कैटभारिहृदयैककृताधिवासा ॥ गौरीत्वमेवश

दु॰
२२

शिरोमौलिकृतपत्तिका ॥ १० ॥ ईषत्सहासममलं परि २
पूर्णचंद्रविंबानुकारिकनकोत्तमकांतिकांतं ॥ अत्य
द्भुतंप्रहृतमात्तरुषातथापिवक्त्रंविलोक्यसहसामहि
षासुरेण ॥ ११ ॥ दृष्ट्वातुदेविकुपितंभ्रुकुटीकरालमु
द्यच्छशांकसदृशछविपन्नसद्यः ॥ प्राणान्मुमोचम
हिषस्तदतीवचित्रंकैर्जीव्यतेहिकुपितांतकदर्श
नेन ॥ १२ ॥ देविप्रसीदपरमाभवतीभवायसद्योवि
नाशयसिकोपवतीकुलानि ॥ विज्ञातमेतदधुनैव
यदस्तमेतन्नीतंबलंसुविपुलंमहिषासुरस्य ॥ १३ ॥

२२

तेसंमताजनपदेषुधनानितेषांतेषांयशांसिनचसी
दतिधर्मवर्गः॥ धन्यास्तएवनिभृतात्मजभृत्यदारा
येषांसदाभ्युदयदाभवतीप्रसन्ना॥ १४॥ धर्म्याणिदेविस
कलानिसदैवकर्माण्यत्यादृतःप्रतिदिनंसुकृतीक
रोति॥ स्वर्गंप्रयातिचततोभवतीप्रसादाल्लोकत्रये
पिफलदाननुदेवितेन॥ १५॥ दुर्गेस्मृताहरसिभीति
मशेषजंतोःस्वस्थैःस्मृतामतिमतीवशुभांददासि
दारिद्र्यदुःखभयहारिणिकात्वदन्यासर्वोपकारक
रणायसदार्द्रचित्ता॥ १६॥ एभिःहतैर्जगदुपैतिसुखंत

५५
२·२३

येते कुर्वंतिनाम नरकाय चिरायपापं ॥ संग्राममृ
त्युमपिगम्यपादंप्रपांतु मत्येतिनूनमहृतात्विनि
हंसिदेवि ॥ ७ ॥ इहैव किंनभवती प्रकरोतिभस्मस
र्वासुरानरिषुयत्र्याहिकेणः यशास्त्रं ॥ लोकान्प्रयांतुरि
पवोपिहिशास्त्रपूताइत्थंमतिर्भवतितेष्वपितेषुसा
ध्वी ॥ १५ ॥ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः ॥ शू
लाग्रकांतिनिवहेनदृशोसुराणां ॥ यन्नागताविल
यमंशुमदिंदुखंडयोग्याननंतवविलोकयतांतदेत
त ॥ १६ ॥ दुर्वृत्तवृत्तशमनंतवदेवीशीलंरूपंतथैतदप

विचित्रमेतत्त्वय्यमत्यै ॥ वीर्यं च हंतृहृतदेवपराक्रमा
णां वैरिष्वपि प्रकटितैव दयात्वयेत्थं ॥ २२ ॥ केनोपमा
भवतु तेस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहा
रि कुत्र ॥ चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्ये
व देवि वरदे भुवनत्रयेपि ॥ २३ ॥ त्रैलोक्यमेतदखि
लं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेपि हत्वा
नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मद
सुरारिभवं नमस्ते ॥ २४ ॥ शूलेन पाहि नो देवि पाहि
खड्गेन चांबिके घंटास्वनेन नः पाहि चापज्यानिःस्व

दे.
२५

नेन च ॥२३॥ प्राच्यां रक्ष प्रतीच्यांच चंडिके रक्ष दक्षि
णे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥२४॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥ यानि
चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवं ॥२५॥ खड्गशू
लगदादीनि यानि चास्त्राणि तेंबिके ॥ करपल्लवसं
गीनि तैरस्मान् रक्ष सर्वतः ॥२६॥ ऋषिरुवाच ॥ एवं
स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः ॥ अर्चिता जगतां धा
त्री तथा गंधानुलेपनैः ॥२७॥ भक्त्या समस्तैस्त्रिदशैर्दि
व्यैर्धूपैस्तु धूपिता ॥ प्राह प्रसादसुमुखी समस्तान् प्रण

तान्स्मरान् ॥२८॥ देव्युवाच ॥ व्रियतां त्रिदशाः सर्वे यद
स्मत्तोभिवांछितं ॥ देवा ऊचुः ॥ भगवत्या कृतं सर्वं न
किंचिदवशिष्यते ॥२९॥ यदयं निहतः शत्रुरस्माकं
महिषासुरः ॥ यदि वापि वरो देयस्त्वयास्माकं महेश्व
रि ॥३०॥ संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥३१॥
तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदा ॥ वृद्धयेस्मत्प्र
सन्ना त्वं भवेथाः सर्वदांबिके ॥३२॥ ऋषिरुवाच ॥ इ
ति प्रसादिता देवैर्जगतोर्थे तथात्मनः ॥ तथेत्युक्त्वा भ

द्रकाली बभूवांतर्हितान्नृप ॥३३॥ इत्येतत्कथितं भू
प संभूता सा यथा पुरा ॥ देवी देवशरीरेभ्यो जगत्त्रय
हितैषिणी ॥३४॥ पुनश्च गौरीदेहात्सा समुद्भूता यथा
भवत् ॥ वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः ॥३५॥
रक्षणाय च लोकानां देवानामुपकारिणी ॥ तच्छृणु
ष्व मयाख्यातं यथावत्कथयामि ते ॥३६॥ इति मार्कं
डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये शक्रादि
स्तुतिश्चतुर्थोध्यायः ॥४॥ ॐ अस्य श्री उत्तमचरित्रस्य
रुद्र ऋषिः अनुष्टुप्छंदः महासरस्वती देव

ता ॥ भीमा शक्तिः भ्रामरी वीजं ॥ सूर्यस्तत्वं ॥ महासर
स्वती प्रीत्यर्थे दुर्गामंत्र जपे विनियोगः ॥ ॐ घंट
शूल हल लानि शंख मुशले चक्रं धनुः सायकं ॥ हस्ता
ब्जैर्दधतीं घनांत विलसच्छीतांशुतुल्य प्रभां ॥ गौरी
देह समुद्भवां त्रिजगतामाधार भूतां महा ॥ पूर्वामत्र
सरस्वतीमनुभजे शुंभादि दैत्यार्दिनीं ॥ १ ॥ इति ध्यानं
ऋषिरुवाच ॥ पुरा शुंभ निशुंभाभ्यामसुराभ्यां शची
पतेः ॥ त्रैलोक्यं यज्ञभागाश्च हृता मद बलाश्रयात्
तावेव सूर्यतां तद्वदधिकारं तथैंदवं ॥ कौवेरम

याम्यंचचक्रातेवरुणस्यच॥२॥तावेवपवनर्द्धिं
चचक्रतुर्वह्निकर्मच॥ततोदेवाविनिर्द्धूताभ्रष्टरा
ज्याःपराजिताः॥३॥हृताधिकारास्त्रिदशास्ताभ्यांस
र्वेनिराकृताः॥महासुराभ्यांतांदेवींसंस्मरंत्यपरा
जितां॥४॥तयास्माकंवरोदत्तोयथापत्सुस्मृताखि
लाः॥भवतांनाशयिष्यामितत्क्षणात्परमापदः॥५
इतिकृत्वामतिंदेवाहिमवंतंनगेश्वरं॥जग्मुस्तत्र
ततोदेवींविष्णुमायांप्रतुष्टुवुः॥६॥देवाऊचुः॥नमो
देव्यैमहादेव्यैशिवायैसततंनमः॥नमःप्रकृत्यैभ

द्रायै नियताः प्रणताः स्मतां ॥७॥ रौद्रायै नमो नित्या
यै गौर्यै धात्र्यै नमो नमः ॥ ज्योत्स्नायै चेंदुरूपिण्यै
सुखायै सततं नमः ॥ ८ ॥ कल्याण्यै प्रणतां वृद्ध्यै सि
द्ध्यै कुर्मो नमो नमः ॥ नैरृत्यै भूभृतां लक्ष्म्यै शर्वाण्यै
ते नमो नमः ॥ ९ ॥ दुर्गायै दुर्गपारायै सारायै सर्वका
रिण्यै ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः
॥ १० ॥ अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ॥ नमो
जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ ११ ॥ या देवी स
र्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै नमस्त

स्यै नमस्तस्यै नमो नमः ॥१२॥ या देवी सर्वभूतेषु चेत
नेत्यभिधीयते नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो
नमः ॥१३॥ या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४॥ या देवी
सर्वभूतेषु निद्रारूपेण संस्थिता ॥ नमस्तस्यै नमस्त
स्यै नमस्तस्यै नमो नमः ॥१५॥ या देवी सर्वभूतेषु क्षुधा
रूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै न
मो नमः ॥१६॥ या देवी सर्वभूतेषु छायारूपेण संस्थि
ता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७॥

यादेवीसर्वभूतेषुशक्तिरूपेणसंस्थिता॥ नमस्तस्यै
नमस्तस्यैनमस्तस्यैनमोनमः॥१८॥यादेवीसर्वभूते
षुतृष्णारूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यैनम
स्तस्यैनमोनमः॥१९॥यादेवीसर्वभूतेषुक्षांतिरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः
२०॥यादेवीसर्वभूतेषुजातिरूपेणसंस्थिता॥नम
स्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥२१॥यादेवीस
र्वभूतेषुलज्जारूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यै
नमस्तस्यैनमोनमः॥२२॥यादेवीसर्वभूतेषुशांतिरू

पेणसंस्थिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोन
मः॥२३॥यादेवीसर्वभूतेषुक्षुधारूपेणसंस्थिता॥न
मस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥२४॥यादेवी
सर्वभूतेषुकांतिरूपेणसंस्थिता॥नमस्तस्यैनमस्त
स्यैनमस्तस्यैनमस्तस्यै नमोनमः॥२५॥यादेवीसर्व
भूतेषुलक्ष्मीरूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यै
नमस्तस्यैनमोनमः॥२६॥यादेवीसर्वभूतेषुवृत्तिरूपे
णसंस्थिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः
२७॥यादेवीसर्वभूतेषुस्मृतिरूपेणसंस्थिता॥नम

स्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥२८॥यादेवीसर्व
भूतेषुदयारूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यैन
मस्तस्यैनमोनमः॥२९॥यादेवीसर्वभूतेषुतुष्टिरूपे
णसंस्थिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोन
मः॥३०॥यादेवीसर्वभूतेषुमातृरूपेणसंस्थिता॥
नमस्तस्यैनमस्तस्यैवनमस्तस्यैनमोनमः॥३१॥या
देवीसर्वभूतेषुभ्रांतिरूपेणसंस्थिता॥नमस्तस्यैन
मस्तस्यैनमस्तस्यैनमोनमः॥३२॥इंद्रियाणामधिष्ठा
त्रीभूतानांचाखिलेषुया॥भूतेषुसततंतस्यैव्याप्ति

देव्यै नमो नमः ॥ ३३ ॥ चितिरूपेण या कृत्स्नमेतद्व्याप
स्थिता जगत् ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो
नमः ॥ ३४ ॥ स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेंद्रे
ण दिनेषु सेविता ॥ करोतु सा नः शुभहेतुरीश्वरी शु
भानि भद्राण्यभिहंतु चापदः ॥ ३५ ॥ या सांप्रतं चो
द्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्ते ॥ या च
स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्तिविनम्र म
मूर्तिभिः ॥ ३६ ॥ ऋषिरुवाच ॥ एवं स्तवादियुक्तानां
देवानां तत्र पार्वती ॥ स्नातुमभ्याययौ तोये जाह्नव्या

न पवनंदनः ॥ ३७ ॥ सा ब्रुवीत्तान सुरान्सुभ्रूर्भवद्भिः स्तूय
ते त्र का ॥ शरीरकोशतश्चास्याः समद्भूता ब्रुवीच्छिवा
॥ ३८ ॥ स्तोत्रं ममैतत्क्रियते शुंभदैत्यनिराकृतैः ॥ देवैः स
मेतैः समरे निशुंभेन पराजितैः ॥ ३९ ॥ शरीरकोशा
यत्तस्याः पार्वत्या निःसृतांबिका ॥ कौशिकीति स
मस्तेषु ततो लोकेषु गीयते ॥ ४० ॥ तस्यां विनिर्गताया
तु कृष्णाभूत्सापि पार्वती ॥ कालिकेति समाख्याता
हिमाचलकृताश्रया ॥ ४१ ॥ ततोंबिकां परं रूपं बिभ्र
णां सुमनोहरं ॥ ददर्श चंडो मुंडश्च भृत्यौ शुंभनिशुं

३ ५०

मयो॥४२॥तीर्थांतेभायचारकाता म्रतीवसन्मनोहर
का ध्वासे स्त्रीभिश्च राजभासयंती हिमाचले॥४३॥नै
वताद ङ्कै चिद्रूपं द्व्रवे न चिड्रत्नमं॥ह्रायता काप्
सादेवा गृहीता चासुरेश्वर॥४४॥स्त्रीरत्नमतिचां
गी योतयंती दशास्त्रिया॥सा तु निवृत्ति देवेंद्रतोम
वानृष्टपर्हति॥४५॥यानि रत्नानि जमणयोगजास्व
दीनि वैप्रभो॥त्रैलोक्येपुत समस्तानि सांप्रतं भांति ते
ग्रहे॥४६॥एरावतः समानीतेण जरत्नं पुरंदरात॥
पारिजाततरुश्चायंतत्पैवोच्चैःश्रवा हयः॥४७॥वि

३०

मानं हंससं पृक्तमेतत्तिष्ठतितैं गुरौ ॥ रक्तामृतमिवानि
तं यदासीद्बुद्बुदसोद्भूतं ॥४८॥ नि[illegible]रे पमहापद्मः समा
नातोप्यनेन्धवरात् ॥ किंजल्किनी ददौ च्चाप्यिमी ला
मम्लानपंकजं ॥४९॥ छत्रं तेवारुणं गेहे कांचन
स्त्राविनिःसृति ॥ तथायं स्पंदनवरोपः पुरासीत्प्रज
पतेः ॥५०॥ मत्तोरुक्रांतिदानाम शक्तिरासत्त्वपा
हृतो ॥ पाशः सलिलराजस्य भ्रातुस्तेवपरिग्रहे ॥ पा
निर्मुंमस्य पाष्टि जातास्य समस्तारत्नजातयः ॥ वन्हि
रपि ददौ तस्म्पमग्निशौचे च वाससी ॥५२॥ एवं देवै

दे
३१

प्ररत्नानिसमस्तान्याहृतानिते ॥ स्त्रीरत्नमेषाकल्या
णीत्वयाकस्मान्नगृह्यते ॥ ५२ ॥ ऋषिरुवाच ॥ निश
म्येतिवचःशुंभःसतदाचंडमुंडयोः ॥ प्रेषयामास
सुग्रीवंदूतंदेव्यामहासुरं ॥ ५४ ॥ इतिचेतिचवक्तव्या
सागत्वावचनान्मम ॥ यथाचाभ्येतिसंप्रीत्यातथा
कार्यंत्वयालघु ॥ ५५ ॥ सतत्रगत्वायत्रास्तेशैलोद्दे
शेतिशोभने ॥ सादेवीतांततःप्राहश्लक्ष्णंमधुरया
गिरा ॥ ५६ ॥ दूतउवाच ॥ देविदैत्येश्वरःशुंभस्त्रैलो
क्येपरमेश्वरः ॥ दूतोहंप्रेषितस्तेनत्वत्सकाशमिह

३१

गतः ॥५७॥ श्रुत्वाहतान्नः सर्वीसयः सदादेवयोनिषु ॥ नि
र्जितारिवल दैत्याधिः सपदाहृअण्वेतत ॥५८॥ मम त्रै
लोक्य मखिलं मम देवावसानुगाः ॥ पन्नभागान हंस
वोनुयाम्याम्मिषयकल्पयत ॥५९॥ त्रैलोक्ये वररत्ना
नि मम वश्यान्यभूत ॥ तथैव गजरत्नानि हृत्वा दे
वेंद्रवाहनं ॥६०॥ क्षीरोदमथनोद्भूतं मम्यवरत्नं मामा
रैः ॥ उच्चैःश्रवसं संहृत्य प्रणिपत्य समर्पितं ॥६१॥ या
नि स्वान्यानि देवेषु गंधर्वेषु रगेषु च ॥ रत्नभूतानि
भूतानि तानि मध्ये वशो मन ॥६२॥ स्त्रीरत्नभूतं त्वां दे

विलोकेमन्यामहेवयं ॥ सात्वमस्मानुपागछयतो
रत्नभुजोवयं ॥ ६३ ॥ मांवाममानुजंवापिनिशुंभमु
रुविक्रमं ॥ भजत्वंचंचलापांगिरत्नभूतासिवै
यतः ॥ ६४ ॥ परमैस्वर्यमतुलंप्राप्ससेमत्परिग्रहा
त् ॥ एतद्बुद्ध्वासमालोच्यमत्परिग्रहतांव्रज ॥ ६५ ॥ ऋ
षिरुवाच ॥ इत्युक्तासातदादेवीगंभीरांतःस्मिता
जगौ ॥ दुर्गाभगवतीभद्राययेदंधार्यतेजगत् ॥ ६६
देव्युवाच ॥ सत्यमुक्तंत्वयानात्रमिथ्याकिंचित्वयो
दितं ॥ त्रैलोक्याधिपतिःशुंभोनिशुंभश्चापितादृ

राः ॥६७॥ किंत्वत्रयत्प्रतिज्ञातंमिथ्यातत्क्रियतेकथं
श्रूयतामल्पबुद्धित्वात्प्रतिज्ञायाकृतापुरा ॥६८॥ योमां
जयतिसंग्रामेयोमेदर्पंव्यपोहति ॥ योमेप्रतिबलो
लोकेसमेभर्त्ताभविष्यति ॥६९॥ तदागच्छतुशुंभोत्र
निशुंभोवामहासुरः ॥ मांजित्वाकिंचिरेणात्रपाणिं
गृह्णातुमेलघु ॥७०॥ दूतउवाच ॥ अवलिप्तासिमै
वंत्वंदेविब्रूहिममाग्रतः ॥ त्रैलोक्येकःपुमांस्तिष्ठे
दग्रेशुंभनिशुंभयोः ॥७१॥ अन्येषामपिदैत्यानांस
र्वेदेवानवैयुधि ॥ तिष्ठंतिसन्मुखेदेविकिंपुनःस्त्री

दु:
३३

त्वमेकिका॥ ७२॥ इंद्राद्याः सकला देवास्तस्थुर्येषां
न संयुगे॥ शुंभादीनां कथं तेषां स्त्री प्रयास्यसि सं
मुखं॥ ७३॥ सा त्वं गच्छ मयैवोक्ता पार्श्वं शुंभनिशुं
भयोः॥ केशाकर्षणनिर्द्धूतगौरवा मा गमिष्यसि॥
७४॥ देव्युवाच॥ एवमेतद्बली शुंभो निशुंभश्चाति
वीर्यवान्॥ किं करोमि प्रतिज्ञा मे यदनालोचिता पु
रा॥ ७५॥ सा त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः
तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु यत्॥ ७६॥ इ
ति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये दू

३३

तसंवादोनामः॥५॥ऋषिरुवाच॥ इत्याकर्ण्यवचोदेव्याः
सदूतोमर्षपूरितः॥ समाचष्टसमागम्यदैत्यराजा
यविस्तरात॥२॥तस्यदूतस्यतद्वाक्यमाकर्ण्यासुर
राट्ततः॥सक्रोधःप्राहदैत्यानामधिपंधूम्रलोच
नं॥३॥हेधूम्रलोचनाशुत्वंस्वसैन्यपरि वारितः॥
तामानयबलाद्दुष्टांकेशाकर्षणविह्वलां॥४॥त
त्परित्राणदःकश्चिद्यदिवोत्तिष्ठतेपरः॥सहंतव्योम
रोवापियक्षोगंधर्वएववा॥५॥ऋषिरुवाच॥तेना
ज्ञप्तस्ततःशीघ्रंसदैत्योधूम्रलोचनः॥वृतःषष्ट्या

सहस्राणामसुराणांद्रुतंययौ ॥५॥ सदृष्ट्वातांततोदे
वींतुहिनाचलसंस्थितां ॥ जगादोच्चैःप्रयाहीतिमू
लंशुंभनिशुंभयोः ॥६॥ नचेत्प्रीत्याद्यभवतीमद्भ
र्त्तारमुपैष्यति ॥ ततोबलान्नयाम्येषकेशाकर्ष
णविह्वलां ॥७॥ देव्युवाच ॥ दैत्येश्वरेणप्रहितोबल
वान्बलसंवृतः ॥ बलान्नयस्यमामेवंततःकिंते
करोम्यहं ॥८॥ ऋषिरुवाच ॥ इत्युक्तःसोभ्यधावत्तामसु
रोधूम्रलोचनः ॥ हुंकारेणैवतंभस्मसाचकारां
बिकाततः ॥९॥ अथक्रुद्धंमहासैन्यमसुराणांतथां

त्वका॥ ववर्षसायकैस्तीक्ष्णैस्तथाशक्तिपरश्वधैः॥१
ततोधुत्तसटोकोपात्कृत्वानादंसभैरवं॥पपातासुर
सेनायांसिंहोदेव्याःस्ववाहनः॥११॥कांश्चित्करप्रहा
रेणदैत्यानास्येनचापरान्॥आक्रांत्याचाधरेनान्य
नसजघानमहासुरान्॥१२॥केषांचित्पाटयामा
सनखैःकोष्टानिकेशरी॥तथातलप्रहारेण॥शि
रांसिकृत्तवान्पृथक्॥१३॥विछिन्नवाहुशिरसःकृ
तास्तेनतथापरे॥पपौचरुधिरंकोष्टादन्येषांधुत
केसरः॥१४॥क्षणेनतद्बलंसर्वंक्षयंनीतंमहा मना

तेनकेसरिनादेव्यावाहनेनातिकोपिना ॥१५॥ श्रुत्वा
तमसुरंदेव्यानिहतंधूम्रलोचनं ॥ बलंचक्षयितं
कृत्स्नंदेवीकेसरिणांततः ॥१६॥ चुकोपदैत्याधि
पतिःशुंभःप्रस्फुरिताधरः ॥ आज्ञापयामासचतौ
चंडमुंडौमहासुरौ ॥१७॥ हेचंडहेमुंडबलैर्बहुलैःपरि
वारितौ ॥ तत्रगच्छतगत्वाचसासमानीयतांलघुः
१८ ॥ केशेष्वाकृष्यबध्वावायदिवःसंसयोयुधि ॥
तदाशेषायुधैःसर्वैरसुरैर्विनिहन्यतां ॥१९॥ तस्यां
हतायांदुष्टायांसिंहेचविनिपातिते ॥ शीघ्रमागम्

त्तोवध्यांगमीत्वात्तामस्यांविकां ॥ २० ॥ इतिमार्कंडे
यपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येधूम्रलोच
नवधः ॥ ६ ॥ ऋषिरुवाच ॥ आज्ञप्तास्तेततोदैत्याश्चं
डमुंडपुरोगमाः ॥ चतुरंगवलोपेताययुरभ्युद्यता
युधा ॥ १ ॥ ददृसुस्तेततोदेवीमीषद्धासांव्यवस्थि
तां ॥ सिंहस्योपरिशैलेंद्रशृंगेमहतिकांचने ॥ २ ॥
तेदृष्ट्वातांसमादातमुद्यमंचक्रुरुद्यताः ॥ आकृष्ट
चापासिधरास्तथान्येतत्समीपगाः ॥ ३ ॥ ततःको
पंचकारोग्रैरंविकातानरीन्प्रति ॥ कोपेनचास्या

उ.
३६.

वदनंमसीवर्णमभूत्तदा ॥ ४ ॥ भ्रूकुटीकुटिलात्तस्या
ललाटफलकाद्द्रुतं ॥ कालीकरालवदनाविनिः
क्रांतासिपाशिनी ॥ ५ ॥ विचित्रखट्वांगधरानरमाला
विभूषणा ॥ द्वीपिचर्मपरीधानाशुष्कमांसातिभै
रवा ॥ ६ ॥ अतिविस्तारवदनाजिह्वाललनभीषणा ॥ नि
मग्नारक्तनयनानादापूरितदिङ्मुखा ॥ ७ ॥ सावेगेना
भिपतिताघातयंतीमहासुरान् ॥ सैन्येतत्रसुरारीणां
मभक्षयततद्बलं ॥ ८ ॥ पार्ष्णिग्राहांकुशग्राहियोधघं
टासमन्वितान् ॥ समादायैकहस्तेनमुखेचिक्षेपवा

३६

रणाजिरे ॥ तथैवयोधंतुरगैरथंसारथिनासह ॥ निहि
प्यवक्त्रेदशनैश्चर्वयंत्यतिभैरवं ॥ १० ॥ एकंजग्राहके
शेषुग्रीवायामथचापरं ॥ पादेनाक्रम्यचैवान्यमु
रसान्यमपोथयत् ॥ ११ ॥ तैर्मुक्तानिचशस्त्राणिम
हास्त्राणितथासुरैः ॥ मुखेनजग्राहरुषादशनैर्म
थितान्यपि ॥ १२ ॥ बलिनांतद्बलंसर्वमसुराणांदु
रात्मनां ॥ ममर्दाभ्यर्दयच्चान्यानन्यांश्चाताडयत्तथा
१३ ॥ असिनानिहताःकेचित्केचित्खट्वांगताडिता
जग्मुर्विनाशमसुरादंताग्राभिहतास्तथा ॥ १४ ॥ दे

दु:
३१ सेनं तद्बलं सर्वमसुराणां निपातितं ॥ दृष्ट्वा चंडोभिदु
द्रावतां कालीमतिभीषणां ॥ १५ ॥ शरवर्षैर्महाभीमै
र्भीमाक्षीं तां महासुरः ॥ छादयामास चक्रैश्च मुंडःक्षि
प्तैः सहस्रशः ॥ १६ ॥ तानि चक्राण्यनेकानि विशमानानि
तन्मुखं ॥ बभुर्यथार्कबिंबानि सुबहूनि घनोदरं ॥ १
७ ॥ ततो जहासातिरुषा भीमं भैरवनादिनी ॥ काली
करालवक्त्रांतर्दुर्दर्शदशनोज्वला ॥ १८ ॥ उत्थाय च म
हासिंहं देवी चंडमधावत ॥ गृहीत्वा चास्य केशेषु शि
रस्तेनासिनाच्छिनत् ॥ १९ ॥ अथ मुंडोभ्यधावत्तां दृ

घ्रा चंडं निपातितं ॥ तमप्यपातयद्भूमौ सा खड्गाभिह
तं रुषा ॥ २० ॥ हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितं ॥
मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं ॥ २१ ॥ शिरश्चंड
स्य काली च गृहीत्वा मुंडमेव च ॥ प्राह प्रचंडाट्टहास
मिश्रमभ्येत्य चंडिकां ॥ २२ ॥ मया तवात्रोपहृतौ चं
डमुंडौ महापशू ॥ युद्धयज्ञे स्वयं शुंभं निशुंभं च हनिष्य
सि ॥ २३ ॥ ऋषिरुवाच ॥ तावानीतौ ततो दृष्ट्वा चंडमुंडौ
महासुरौ ॥ उवाच कालीं कल्याणी ललितं चंडिका
वचः ॥ २४ ॥ यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता

३८ चामुंडेति ततो लोके रव्याता देवी भविष्यसि ॥ २७ ॥ इ
ति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये चं
डमुंडवधः ॥ ७ ॥ ऋषिरुवाच ॥ चंडे च निहते दैत्ये मुंडे
च विनिपातिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्व
रः ॥ १ ॥ ततः कोपपराधीनचेताः शुंभः प्रतापवान्
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ २ ॥ अ
द्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥ कंबूनां
चतुराशीतिर्निर्यांतु स्वबलैर्वृताः ॥ ३ ॥ कोटिवीर्या
णि पंचाशदसुराणां कुलानि वै ॥ शतं कुलानि धौ

म्राणां निर्गछंतु ममाज्ञया ॥ ४ ॥ कालका दौहृदा मौर्याः
कालकेयास्तथासुराः ॥ युद्धाय सज्जा निर्यांतु आज्ञ
या त्वरिता मम ॥ ५ ॥ इत्याज्ञाप्यासुरपतिः शुंभो भै
रवशासनः ॥ निर्जगाम महासैन्यसहस्रैर्बहुभि
र्वृतः ॥ ६ ॥ आयांतं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणं
ज्याखनैः पूरयामास धरणीगगनांतरं ॥ ७ ॥ ततः
सिंहो महानादमतीव कृतवान्नृप ॥ घंटास्वनेन त
न्नादमंबिका चोपबृंहयत ॥ ८ ॥ धनुर्ज्यासिंह
घंटानां शब्दापूरितदिङ्मुखा ॥ निनादैर्भीषणैः

दुः
३९

कालीजिग्येविस्तारितानना ॥ ९ ॥ तन्निनादमुप
श्रुत्यदैत्यसैन्यैश्चतुर्दिशं ॥ देवीसिंहस्तथाकाली
सरोषैःपरिवारिताः ॥ १० ॥ एतस्मिन्नंतरेभूपविना
शायसुरद्विषां ॥ भवायामरसिंहानामतिवीर्यब
लान्विताः ॥ ११ ॥ ब्रह्मेशगुहविष्णूनांतथेंद्रस्यच
शक्तयः ॥ शरीरेभ्योविनिष्क्रम्यतद्रूपैश्चंडिकांय
युः ॥ १२ ॥ यस्यदेवस्ययद्रूपंयथाभूषणवाहनं ॥ त
द्वदेवहितच्छक्तिरसुरान्योद्धुमाययौ ॥ १३ ॥ हंसयुक्तवि
मानाग्रेसाक्षसूत्रकमंडलुः ॥ आयाताब्रह्मणःश ३९

क्तिवृन्दापरिचायिते ॥ १४ ॥ माहेश्वरी वृषारू
ढा त्रिशूलवरधारिणी ॥ महाहिवलयप्राप्ता चंद्ररेखा
विभूषणा ॥ १५ ॥ कौमारी शक्तिहस्ता च मयूरवर वा
हना ॥ योद्धुमभ्याययौ दैत्यानंबिका गुहरूपिणी ॥ १६
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥ शंखच
क्रगदाशार्ङ्गःखड्गहस्ताभ्युपाययौ ॥ ७ ॥ यज्ञवाराह
मतुलं रूपं या बिभ्रतो हरेः ॥ शक्तिः साप्याययौ तत्र
वाराही बिभ्रती तनुं ॥ १८ ॥ ~~नारसिंही नृसिंहस्य बिभ्रती ना~~
नारसिंही नारसिंहस्य बिभ्रती सदृशं वपुः ॥ प्राप्ता तत्र

दु° ४०

सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥१९॥ वज्रहस्ता तथैवैंद्री
गजराजोपरि स्थिता ॥ प्राप्ता सहस्रनयना यथा श-
क्रस्तथैव सा ॥ ततः परिवृतस्ताभिरीशानो देवशक्ति-
भिः ॥ हन्यंतामसुराः शीघ्रं मम प्रीत्याह चंडिकां ॥२१॥
ततो देवीशरीरात्तु विनिष्क्रांतातिभीषणा ॥ चंडिकाश-
क्तिरत्युग्रा शिवाशतनिनादिनी ॥२२॥ सा चाह धूम्रज-
टिलमीशानमपराजिता ॥ दूत त्वं गच्छ भगवन्पा-
र्श्वं शुंभनिशुंभयोः ॥२३॥ ब्रूहि शुंभं निशुंभं च दानवा-
वतिगर्वितौ ॥ ये चान्ये दानवास्तत्र युद्धाय समुपस्थि- ४०

ता ॥ २४ ॥ त्रैलोक्यमिंद्रो लभतां देवासंतु हविर्भुजः ॥ प
यं प्रयात पातालं यदि जीवितुमिच्छथ ॥ २५ ॥ बलाव
लेपादथ चेद्भवंतो युद्धकांक्षिणः ॥ तदागच्छत तृप्यं
तु मच्छिवाः पिशितेन वः ॥ २६ ॥ यतो नियुक्तो दौत्येन त
या देव्या शिवः स्वयं ॥ शिवदूतीति लोकेस्मिंस्ततः
सा ख्यातिमागता ॥ २७ ॥ तेपि श्रुत्वा वचो देव्याः सर्वा
ख्यातं महासुराः ॥ अमर्षापूरिता जग्मुर्यत्र कात्या
यनी स्थिता ॥ २८ ॥ ततः प्रथममेवाग्रे शरशक्त्यृष्टि
वृष्टिभिः ॥ ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥ २९

८
४२

साचतान्प्रहितान्वाणान्शूलशक्तिपरस्वधान॥चि
छेदलीलयाध्मातधनुर्मुक्तैर्महेषुभिः॥३०॥तस्याग्रत
स्तथाकालीशूलपातविदारितान॥खट्वांगपोथितां
श्चारीन्कुर्वतीव्यचरत्तदा॥३१॥कमंडलुजलाक्षेप
हतबीर्यान्हतौजसः॥ब्रह्माणीचाकरोच्छत्रून्येन
येनस्मधावति॥३२॥माहेश्वरीत्रिशूलेनतथाच
क्रेणवैष्णवी॥दैत्यान्जघानकौमारीतथाशक्त्या
तिकोपना॥३३॥ऐंद्रीकुलिशपातेनशतशोदैत्यदा
नवाः॥पेतुर्विदारिताःपृथ्व्यांरुधिरौघप्रवर्षिणः॥३४॥

तुंडप्रहारविध्वस्ता दंष्ट्राग्रहतवक्षसः ॥ वाराहमूर्त्यां
न्यपतंश्चक्रेण चावि दारिताः ॥ ३५ ॥ नखैर्विदारितां
श्चान्यान्भक्षयंती महासुरान् ॥ नारसिंही चचाराजौ
नादापूर्णदिगंतरा ॥ ३६ ॥ चंडाट्टहासैरसुराः शिवदू
त्यभिदूषिताः ॥ पेतुः पृथ्व्यां पतितांस्तांश्चखादाथ
सा तदा ॥ ३७ ॥ इति मातृगणं क्रुद्धं मर्दयंतं महासुरान्
दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३८ ॥ पला
यनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्या
ययौ क्रुद्धो रक्तबीजो महासुरः ॥ ३९ ॥ रक्तबिंदुर्यदा

भूमौपततस्यशरीरतः ॥ समुत्पतंतिमेदिन्यांत्तो
त्प्रमाणस्तदासुरः ॥ ४० ॥ युयुधेस्मगदापाणिरिंद्रश
क्त्यामहासुरः ॥ ततःऐंद्रीस्ववज्रेणरक्तवीजमताड
यत ॥ ४१ ॥ कुलिशेनाहतस्याशुतस्यसुस्रावशोणि
तं ॥ समुत्तस्थुस्ततोयोधास्तद्रूपास्तत्पराक्रमाः ॥ ४२
यावंतः पतितास्तस्यशरीराद्रक्तविंदवः ॥ तावंतः
पुरुषाजातास्तद्वीर्यबलविक्रमाः ॥ ४३ ॥ तेचापियु
युयुधुस्तत्रपुरुषारक्तसंभवाः ॥ समंमातृभिरत्युग्र
शस्त्रपातातिभीषणं ॥ ४४ ॥ पुनश्चवज्रपातेनक्षत

मस्यशिरोपदा॥ववाहरक्तंपुनरप्यस्ततोजाताःसह
स्रशः॥४५॥वैष्णवीसमरेचैनंचक्रेणाभिजघान
ह॥गदयाताडयामासऐंद्रीतमसुरेश्वरं॥४६॥वैष्ण
वीचक्रभिन्नस्यतस्यरुधिरस्रावसंभवैः॥सहस्रशोज
गद्व्याप्तंतत्प्रमाणैर्महासुरैः॥४७॥शक्त्याजघानकौ
मारीवाराहीचतथासिना॥माहेश्वरीत्रिशूलेनर
क्तबीजमहासुरं॥४८॥सचापिगदयादैत्यःसर्वा
एवाहनत्पृथक्॥मातृःकोपसमाविष्टोरक्तबी
जोमहासुरः॥४९॥तस्याहतस्यबहुधाशक्तिशूला

दिभिर्भुवि ॥ पपातयोवैरक्तौघस्तेनासंछतशोसुराः
५० ॥ तैश्चासुरासृक्संभूतैरसुरैः सकलंजगत ॥ व्याप्त
मासीत्ततोदेवाभयमाजग्मुरुत्तमं ॥ ५१ ॥ तान्विषण्णान्सु
रान्दृष्ट्वाचंडिकाप्राहसत्वरा ॥ उवाचकालींचामुं
डेविस्तारंवदनंकुरु ॥ ५२ ॥ मच्छस्त्रपातसंभूतानर
क्तबिंदून्महासुरान ॥ रक्तबिंदोः प्रतीछत्वंवक्त्रेण
नेनवेगिता ॥ ५३ ॥ भक्षयंतीचररणेतदुत्पन्नान्म
हासुरान् ॥ एवमेषक्षयंदैत्यः क्षीणरक्तोगमिष्यति
५४ ॥ भक्ष्यमाणास्त्वयाचोग्रानचोत्पत्स्यंतिचापरे

इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तं ॥५५॥ मुखे
न काली जगृहे रक्तबीजस्य शोणितं ॥ ततोसावाज
घानाथ गदया तत्र चंडिकां ॥५६॥ न चास्या वेदनां च
क्रे गदापातोल्पिकामपि ॥ तस्याहतस्य देहात्तु बहु सु
स्राव शोणितं ॥५७॥ यतस्ततस्तद्वक्त्रेण चामुंडा संप्र
तीछति ॥ मुखे समुद्गता येस्या रक्तपातान्महासुराः
॥५८॥ तांश्चखादाथ चामुंडा पपौ तस्य च शोणितं ॥ दे
वी शूलेन वज्रेण बाणैरसिभिरृष्टिभिः ॥५९॥ जघा
न रक्तबीजं तं चामुंडापीतशोणितं ॥ स पपात म

दु
५४ लोपक्षेशस्त्रसंघसमाहतः ॥६०॥ नीरक्तश्च महीपा
ल रक्तबीजो महासुरः ॥ ततो हर्षमतुलमवापु
स्त्रिदशा नृप ॥६१॥ तेषां मातृगणो जातो ननर्तासृ
ङ्मदोद्धतः ॥६२॥ इति मार्कंडेयपुराणे सावर्णिके मन्वं
तरे देवीमाहात्म्ये रक्तबीजवधः ॥८॥ राजोवाच ॥ विचित्र
मिदमाख्यातं भगवन्भवता मम ॥ देव्याश्चरितमा
हात्म्यं रक्तबीजवधाश्रितं ॥१॥ भूयश्चेच्छाम्यहं श्रो
तुं रक्तबीजे निपातिते ॥ चकार शुंभो यत्कर्म निशुं
भश्चातिकोपनः ॥२॥ ऋषिरुवाच ॥ चकार कोपम

तुलं रक्तबीजे निपातिते ॥ शुंभासुरो निशुंभश्च हते
ष्वन्येषु चाहवे ॥ ३ ॥ हन्यमानं महासैन्यं विलोक्याम
र्षमुद्वहन् ॥ अभ्यधावन्निशुंभोथ मुख्ययासुरसेन
या ॥ ४ ॥ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः
संदष्टौष्ठपुटाः क्रुद्धा हंतुं देवीमुपाययुः ॥ ५ ॥ आजगा
म्महावीर्यः शुंभोपि स्वबलैर्वृतः ॥ निहंतुं चंडिका
कोपात्कृत्वा युद्धं तु मातृभिः ॥ ६ ॥ ततो युद्धमतीवास
द्देव्याः शुंभनिशुंभयोः ॥ शरवर्षमतीवोग्रं मेघयोरि
व वर्षतोः ॥ ७ ॥ चिच्छेदास्ताञ्छरांस्ताभ्यां चंडिकास

सरोत्करैः ॥ ताडयामासचांगेषुशस्त्रौघैरसुरेश्वरौ
द ॥ निसुंभोनिसितंखड्गंचर्मचादायसुप्रभं ॥ अता
डयन्मूर्ध्निसिंहंदेव्यावाहनमुत्तमं ॥ ९ ॥ ताडितेवा
हनेदेवीक्षुरप्रेणासिमुत्तमं ॥ निसुंभस्याशुचिच्छेद
चर्मचाप्यष्टचंद्रकं ॥ १० ॥ छिन्नेचर्मणिखड्गेच
शक्तिंचिक्षेपसोसुरः ॥ तामप्यस्यद्विधाचक्रेचक्रेणा
भिमुखागता ॥ ११ ॥ कोपाध्मातोनिसुंभोथशूलंज
ग्राहदानवः ॥ आयांतंमुष्टिपातेनदेवीतच्चाप्यचू
र्णयत ॥ १२ ॥ आविध्याथगदांसोपिचिक्षेपचंडिकां

प्रति ॥ सा पदेव्या त्रिशूलेन भिन्ना भूमत्वमागता ॥
ततः परशुहस्तं तमायांतं दैत्यपुंगवं ॥ आहत्य देवी बा
णौघैरपातयत भूतले ॥ १४ ॥ तस्मिन्निपतिते भूमौ
निशुंभे भीमविक्रमे ॥ भ्रातर्यतीव संक्रुद्धः प्रययौ हं
तुमंबिकां ॥ १५ ॥ स रथस्थस्तथात्युच्चैर्गृहीतपरमा
युधैः ॥ भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥ १६
तमायांतं समालोक्य देवी शंखमवादयत ॥ ज्याश
ब्दं चापि धनुषश्चकारातीव दुःसहं ॥ ७ ॥ पूरयामा
स ककुभो निजघंटास्वनेन च ॥ समस्तदैत्यसैन्या

८

४६

नीतेजोवधयविधीयमना ॥१८॥ ततः सिंहोमहानादै
स्त्याजितेभमहामदैः ॥ पूरयामासगगनंगांतथैवादि
शोदश: ॥१९॥ ततः कालीसमुत्पत्यगगनंक्ष्मामता
डयत् ॥ कराभ्यांतन्निनादेनप्राक्स्व नास्तेतिरोहि
ता: ॥२०॥ अट्टाट्टहासमशिवंशिवदूती चकारह ॥ तैः
शब्दैरसुरास्त्रेसुः शुंभः कोपंपरंययौ ॥२१॥ दुरात्म
न्स्तिष्ठतिष्ठेतिव्याजहारांबिकायदा ॥ तदाजयेत्यभि
हितंदेवैराकाशसंस्थितैः ॥२२॥ शुंभेनागत्ययाश
क्तिर्मुक्ताज्वालातिभीषणा ॥ आयांतीवह्निकूटा

४६

मासानिरस्तामाहोल्कया ॥ २२ ॥ सिंहनादेनसुंभस्य
व्याप्तलोकत्रयांतरं ॥ निर्घातनिःस्वनोघोरोजितवा
नवनीपते ॥ २३ ॥ सुंभमुक्तांछरान्देवीसुंभस्तत्प्रहिता
छरान् ॥ चिछेदस्वशरैरुग्रैः शतसोपसहस्रशः ॥ २४ ॥
ततः साचंडिकाक्रुद्धाशूलेनाभिजघानतं ॥ सतदाभि
हतोभूमौमूर्छितोनिपपातह ॥ २५ ॥ ततोनिसुंभः सं
प्राप्यचेतनामात्तकार्मुकः ॥ आजघानशरैर्देवीका
लींकेसरिणंतथा ॥ २६ ॥ पुनश्चकृत्वाबाहूनामयु
तंदनुजेश्वरः ॥ चक्रायुधेनदितिजश्छादयामासचं

दुः
९७

डिकां ॥२८॥ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥२९॥
ततो निशुम्भो वेगेन गदामादाय चंडिकां ॥ अभ्यधाव
त वै हंतुं दैत्यसेनासमावृतः ॥३०॥ तस्यापतत एवा
शु गदां चिच्छेद चंडिका ॥ खड्गेन शितधारेण स च शू
लं समाददे ॥३१॥ शूलहस्तं समायांतं निशुंभममरार्द
नं ॥ हृदि विव्याध शूलेन वेगाविद्धेन चंडिका ॥३२॥ भि
न्नस्य तस्य शूलेन हृदयान्निःसृतोपरः ॥ महाबलो महा
वीर्यस्तिष्ठेति पुरुषो वदन ॥३३॥ तस्य निष्क्रामतो दे

वीप्रहस्यस्वनवर्ज्जत: ॥ शिरश्छेदखड्गेनततोसाव
पतद्भुवि ॥३४॥ ततःसिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोध
रान ॥ असुरास्तांस्तथाकालीशिवदूतीतथापरान्
३५॥ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ॥
ब्रह्माणीमंत्रपूतेनतोयेनान्येनिराकृताः ॥३६॥ माहे
श्वरीत्रिशूलेनभिन्नापेतुस्तथापरे ॥ वाराहीतुंडघा
तेनकेचिच्चूर्णीकृताभुवि ॥३७॥ खंडखंडंचचक्रेण
वैष्णव्यादानवाः कृताः ॥ वज्रेणचैंद्रीहस्ताग्रविमुक्ते
नतथापरे ॥३८॥ केचिद्विनेशुरसुराः केचिन्नष्टामहा

कवात ॥ भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः
॥२५॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
निशुंभवधः ॥८॥ ऋषिरुवाच ॥ निशुंभं निहतं दृष्ट्वा भ्रा
तरं प्राणसंमितं ॥ हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्र
वीद्वचः ॥१॥ बलावलेपादुष्टे त्वं मा दुर्गे गर्वमावह ॥
अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी ॥२॥ देव्यु
वाच ॥ एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥ प
श्यैता दुष्ट मय्येव विशंत्यो मद्विभूतयः ॥३॥ ततः सम
स्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं ॥ तस्या देव्यास्तनौ

जग्मुरेकैवासीत्तदांबिका ॥ ४ ॥ देव्युवाच ॥ अहं विभूत्या
बहुभिरिह रूपैर्यदास्थिता ॥ तत्संहृतं मयैकैव तिष्ठा
म्याजौ स्थिरो भव ॥ ५ ॥ ऋषिरुवाच ॥ ततः प्रववृते यु
द्धं देव्याः शुंभस्य चोभयोः ॥ पश्यतां सर्वदेवानां असुराणां
च दारुणं ॥ ६ ॥ शर वर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारु
णैः ॥ तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरं ॥ ७ ॥ दिव्या
न्यस्त्राणि शतशो मुमुचे यान्यथांबिका ॥ बभंज तानि
दैत्येंद्रस्तत्प्रतीघातकर्तृभिः ॥ ८ ॥ मुक्तानि तेन चास्त्रा
णि दिव्यानि परमेश्वरी ॥ बभंज लीलयैवोग्रहुंका

रोच्चारतलादिभिः ॥ ९ ॥ ततः शरशतैर्देवीमाछादयत सो
ऽसुरः ॥ सापि तत्कुपिता देवी धनुश्चिछेद चेषुभिः ॥
१० ॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे ॥ चिछेद
देवी चक्रेण तामप्यस्य करे स्थितां ॥ ११ ॥ ततः खड्ग
मुपादाय शतचंद्रं च भानुमत् ॥ अभ्यधावत्तदा देवीं
दैत्यानामधिपेश्वरः ॥ १२ ॥ तस्यापतत एवाशु खड्गं
चिछेद चंडिका ॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरा
मलं ॥ १३ ॥ हताश्वः स तदा दैत्यश्छिन्नधन्वा विसार
थिः ॥ जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः ॥ १४ ॥

चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥ तथापि सो
ऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान ॥१५॥ स मुष्टिं पातया
मास हृदये दैत्यपुंगवः ॥ देव्यास्तं चापि सा देवी तलेनो
रस्यताडयत् ॥१६॥ तलप्रहाराभिहतो निपपात मही
तले ॥ स दैत्यराजः सहसा पुनरेव तथोत्थिता ॥१७॥
उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥ तत्रापि सा
निराधारा युयुधे तेन चंडिका ॥१८॥ नियुद्धं खे तदा
दैत्यश्चंडिका च परस्परं ॥ चक्रतुः प्रथमं सिद्धमुनि
विस्मयकारकं ॥१९॥ ततो नियुद्धं सुचिरं कृत्वा तेनां

विकासक || उत्पात्य भ्रामयामास चिक्षेप धरणीत
ले || २४ || सक्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः
अभ्यधावत दुष्टात्मा चण्डिकानिधनेछया || २५ || तमा
यातं ततो देवी सर्वदैत्यजनेश्वरं || जगत्यां पातयामा
स भित्वा शूलेन वक्षसि || २६ || स गतासुः पपातोर्व्यां
देवीशूलाग्रविक्षतः || चालयन्सकलां पृथ्वीं सा
ब्धिद्वीपां सपर्वतां || २७ || ततः प्रसन्नमखिलं हते
तस्मिन्दुरात्मनि || जगत्स्वास्थ्यमतीवाप निर्मलं चा
भवन्नभः || २८ || उत्पातमेघाः सोल्का ये प्रागासंस्ते

ते शमंययुः॥ सरितोमार्गवाहिन्यस्तथासंस्तत्रपा
तिते॥२५॥ ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः॥
बभूवुर्निहतेतस्मिन्गंधर्वाललितंजगुः॥२६॥अ
वादयंस्तथैवान्येननृतुश्चाप्सरोगणाः॥ववुःपुण्या
स्तथावाताःसुप्रभोभूद्दिवाकरः॥२७॥जज्वलुश्चा
ग्नयःशांताःशांतादिग्जनितस्वनाः॥२८॥ इतिमार्कं
डेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येशुंभवधः॥
१०॥ऋषिरुवाच॥ देव्याहतेतत्रमहासुरेंद्रेसेंद्राःसुरा
वन्हिपुरोगमास्तां॥ कात्यायनींतुष्टुवुरिष्टलाभाद्वि

5·
५१

काशवक्त्रास्तुविकाशिताशाः॥१॥देवीप्रपन्नार्त्तिह
रेप्रसीदप्रसीदमातर्जगतोखिलस्य॥प्रसीदविश्वे
श्वरिपाहिविश्वंत्वमीश्वरीदेवीचराचरस्य॥२॥आ
धारभूताजगतस्त्वमेकामहीस्वरूपेणयतःस्थित
सि॥अपांस्वरूपेस्थितयात्वयैतदाप्यायतेकृत्स्न
मलंघ्यवीर्ये॥३॥त्वंवैष्णवीशक्तिरनंतवीर्याविश्व
स्यबीजंपरमासिमाया॥संमोहितंदेवीसमस्तमेत
त्वंवैप्रसन्नामविमुक्तिहेतुः॥४॥विद्याःसमस्तास्त
देविभेदाःस्त्रियःसमस्ताःसकलाजगत्सु॥त्वयैक

या पूरितमंवयैतत्कातेस्तुतिः स्तव्यपरापरोक्तिः ॥५॥
सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायनी ॥ त्वंस्तुतास्तु
तये का वा भवंति परमोक्तयः ॥६॥ सर्वस्य बुद्धिरूपेण
जनस्य हृदि संस्थिते ॥ स्वर्गापवर्गदे देवि नारायणि न
मोस्तुते ॥७॥ कलाकाष्ठादिरूपेण परिणामप्रदायि
नि ॥ विश्वस्योपरतौ शक्ते नारायणि नमोस्तुते ॥८॥ स
र्वमंगलमंगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंव
के गौरि नारायणि नमोस्तुते ॥९॥ सृष्टिस्थितिविना
शानां शक्तिभूते सनातनी ॥ गुणाश्रये गुणमये नार

पु.
५२

यणिनमोस्तुते॥१०॥शरणागतदीनार्त्तपरित्राण
परायणे॥सर्वस्यार्त्तिहरेदेवीनारायणिनमोस्तुते
॥११॥हंसयुक्तविमानस्थेब्रह्माणीरूपधारिणी॥कौ
शाम्भःक्षरिकेदेविनारायणिनमोस्तुते॥१२॥त्रिशूल
चंद्राहिधरेमहावृषभवाहिनि॥माहेश्वरीस्वरूपे
णनारायणिनमोस्तुते॥१३॥मयूरकुक्कुटवृतेमहा
शक्तिधरेनघे॥कौमारीरूपसंस्थानेनारायणिनमो
स्तुते॥१४॥शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे॥
प्रसीदवैष्णवीरूपेनारायणिनमोस्तुते॥१५॥गृही

तोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे ॥ वराहरूपिणि शि
वे नारायणि नमोस्तु ते ॥१६॥ नृसिंहरूपेणोग्रेण हं
तुं दैत्यान्कृतोद्यमे ॥ त्रैलोक्यत्राणसहिते नारायणि
नमोस्तु ते ॥१७॥ किरीटिनि महावज्रे सहस्रनयनो
ज्ज्वले ॥ वृत्रप्राणहरे चैंद्रि नारायणि नमोस्तु ते ॥१८
शिवदूतीस्वरूपेण हतदैत्यमहाबले घोररूपे महा
रावे नारायणि नमोस्तु ते ॥१९॥ दंष्ट्राकरालवदने
शिरोमालाविभूषणे ॥ चामुंडे मुंडमथने नारायणि
नमोस्तु ते ॥२०॥ लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे

ष्के वे ॥ महारात्रे महामाये नारायणि नमोस्तुते ॥२१॥
मेधे सरस्वती वरे भूति बाभ्रवि तामसि ॥ नियते त्वं प्र
सीदेशे नारायणि नमोस्तुते ॥२२॥ सर्वस्वरूपे सर्वेशे
सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे दे
वि नमोस्तुते ॥२३॥ एतत्ते वदनं सौम्यं लोचनत्रयभू
षितं ॥ पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तुते
॥२४॥ ज्वालाकरालमत्युग्रमशेषासुरसूदनं ॥ त्रिशू
लं पातु नो भीतेर्भद्रकाली नमोस्तुते ॥२५॥ हिनस्ति दै
त्यतेजांसि स्वनेनापूर्य या जगत ॥ सा घंटा पातु नो दे

वि पापेभ्योनःसुतानिव ॥ २७ ॥ असुरासृग्वसापंकच
र्चितस्तेकरोज्वलः ॥ शुभायखड्गोभवतुचंडिकेत्वां
नतावयं ॥ २८ ॥ रोगानशेषानपहंसितुष्टारुष्टातुका
मान्सकलानभीष्टान् ॥ त्वामाश्रितानांनविपन्न
राणांत्वामाश्रिताह्याश्रयतांप्रयांति ॥ २९ ॥ एतत्कृ
तंयत्कदनंत्वयाद्यधर्मद्विषांदेविमहासुराणां ॥ रू
पैरनेकैर्बहुधात्ममूर्त्तिंकृत्वांबिकेतत्प्रकरोतिका
न्या ॥ ३० ॥ विद्यासुशास्त्रेषु विवेकदीपेष्वाद्येषु
वाक्येषुचकात्वदन्या ॥ ममत्वगर्तेतिमहांधकारे

5·
५४

विभ्रामयत्येतदतीव विश्वं ॥३०॥ रक्षांसि यत्रोग्रवि
षाश्च नागा यत्रारयो दस्युबलानि यत्र ॥ दावानलो
यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वं ॥
३१॥ विश्वेश्वरी त्वं परिपासि विश्वं विश्वात्मिका धा
रयसीति विश्वं ॥ विश्वेशवंद्या भवती भवंति वि
श्वाश्रया ये त्वयि भक्तिनम्रा ॥३२॥ देवि प्रसीद परि
पालय नोरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकज
नितांश्च महोपसर्गान ॥३३॥ प्रणतानां प्रसीद त्वं दे

विविश्वार्त्तिहारिणि ॥ त्रैलोक्यवासिनामीड्येलोका
नांवरदाभव ॥३४॥ देव्युवाच ॥ वरदाहंसुरगणावरं
यन्मनसेछथ ॥ तंवृणुध्वंप्रयछामिजगतामुपका
रकं ॥३५॥ देवाऊचुः ॥ सर्वाबाधाप्रशमनंत्रैलोक्य
स्याखिलेश्वरि ॥ एवमेवत्वयाकार्यमस्मद्वैरिवि
नाशनं ॥३६॥ देव्युवाच ॥ वैवस्वतेंतरेप्राप्तेअष्टावि
शतिमेयुगे ॥ शुंभोनिशुंभश्चैवान्यावुत्पत्स्येतेमहा
सुरौ ॥३७॥ नंदगोपगृहेजातायशोदागर्भसंभवा
ततस्तौनाशयिष्यामिविंध्याचलनिवासिनी ॥३८॥

दु॰
५५

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥ अवतीर्य
हनिष्यामि वैप्रचित्तांस्तु दानवान् ॥ ३९ ॥ भक्षयंत्या
श्च तानुग्रान्वैप्रचित्तान्महासुरान् ॥ रक्ता दंता भवि
ष्यंति दाडिमीकुसुमोपमाः ॥ ४० ॥ ततो मां देवताः स्व
र्गे मर्त्यलोके च मानवाः ॥ स्तुवंतो व्याहरिष्यंति स
ततं रक्तदंतिकां ॥ ४१ ॥ भूयश्च शतवार्षिक्यामना
वृष्ट्यामनंभसि ॥ मुनिभिः संस्तुता भूमौ संभवि
ष्याम्ययोनिजा ॥ ४२ ॥ ततः शतेन नेत्राणां निरीक्षि
ष्यामि यन्मुनीन् ॥ कीर्तयिष्यंति मनुजाः शताक्षी ५५

क्षीमिति मां ततः ॥ ४३ ॥ ततोहमखिलं लोकमात्मदेह
समुद्भवैः ॥ भरिष्यामि सुराः शाकैरावृष्टेः प्राणधार
कैः ॥ ४४ ॥ शाकंभरीति विख्यातिं तदा यास्याम्यहं भु
वि ॥ तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरं ॥ ४५ ॥ दु
र्गा देवीति विख्यातं तन्मे नाम भविष्यति ॥ पुनश्चाहं
यदा भीमं रूपं कृत्वा हिमाचले ॥ ४६ ॥ रक्षांसि भक्ष
यिष्यामि मुनीनां त्राणकारणात् ॥ तदा मां मुनयः
सर्वे स्तोष्यंत्यानम्रमूर्तयः ॥ ४७ ॥ भीमा देवीति विख्या
तं तन्मे नाम भविष्यति ॥ यदारुणाख्यस्त्रैलोक्ये म

हाबाधांकरिष्यति ॥४८॥ तदाहंभ्रामरंरूपंकृत्वासं
ख्येयषट्पदं ॥ त्रैलोक्यस्यहितार्थायवधिष्यामि
महासुरं ॥४९॥ भ्रामरीतिचमांलोकास्तदास्तोष्य
तिसर्वतः ॥ इत्थंयदायदाबाधादानवोत्थाभवि
ष्यति ॥५०॥ तदातदावतीर्याहंकरिष्याम्य
रिसंक्षयं ॥५१॥ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंत
रेदेवीमाहात्म्येनारायणीस्तुतिः ॥११॥ देव्युवाच ॥ ए
भिःस्तवैश्चमांनित्यंस्तोष्यतेयःसमाहितः ॥ तस्या
हंसकलांबाधांशमयिष्याम्यसंशयं ॥१॥ मधु

कैटभनाशंचमहिषासुरघातनं॥ कीर्तयिष्यंतिये
तद्वद्वधंशुंभनिशुंभयोः॥३॥ अष्टम्यांचचतुर्दश्यां
नवम्यांचैकचेतसः॥ श्रोष्यंतिचैवयेभक्त्याममम
माहात्म्यमुत्तमं॥४॥ नतेषांदुष्कृतंकिंचिद्दुष्कृतोत्था
नचापदः॥ भविष्यतिनदारिद्र्यंनचैवेष्टवियोजनं
५॥ शत्रुतोनभयंतस्यदस्युतोवानराजतः॥ नशस्त्रान
लतोयौघात्कदाचित्संभविष्यति॥६॥ तस्मान्ममैत
न्माहात्म्यंपठितव्यंसमाहितैः॥ श्रोतव्यंचसदाभक्त्या
परंस्वस्त्ययनंमहत॥७॥ उपसर्गानशेषांस्तुमहाम

रीसमुद्भवान् ॥ तस्मात्त्रिविधमत्स्यानं महात्म्यं शमये
न्मम ॥ ७ ॥ यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ॥
सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितं ॥ ८ ॥
बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ॥ सर्वं
ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥ ९ ॥ जानताजा
नता वापि बलिपूजां तथा कृतां ॥ प्रतीच्छिष्याम्य
हं प्रीत्या वह्निहोमं तथा कृतं ॥ १० ॥ शरत्काले महा
पूजा क्रियते या च वार्षिकी ॥ तस्यां ममैतन्महात्म्यं
श्रुत्वा भक्तिसमन्वितः ॥ ११ ॥ सर्वावाधाविनिर्मुक्तो

धनधान्यसमन्विताः ॥ मनुष्यो मत्प्रसादेन भविष्य
ति न संशयः ॥ १२ ॥ श्रुत्वा ममैतन्माहात्म्यं तथा चोत्प
त्तयः शुभाः ॥ पराक्रमं च युद्धेषु जायते निर्भयः पु
मान् ॥ १३ ॥ रिपवः संक्षयं यांति कल्याणं चोपप
द्यते ॥ नंदते च कुलं पुंसां माहात्म्यं मम शृण्वतां ॥
१४ ॥ शांतिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ॥ ग्रह
पीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १५ ॥ उपस
र्गाः शमं यांति ग्रहपीडाश्च दारुणाः ॥ दुःस्वप्नं च नृ
भिर्दृष्टं सुस्वप्नमुपजायते ॥ १६ ॥ बालग्रहाभिभूता

८ नांबालानांशांतिकारकं॥संघातभेदेचनृणांमैत्री
करणमुत्तमं॥७॥दुर्वृत्तानामशेषाणांबलहानिक
रंपरं॥रक्षोभूतपिसाचानांपठनादेवनाशनं॥१८
सर्वंममैतन्माहात्म्यंममसन्निधिकारकं॥पशुपु
ष्पार्घधूपैश्चगंधदीपैस्तथोत्तमैः॥१९॥विप्राणां
भोजनैर्होमैःप्रोक्षणीयैरहर्निशं॥अन्यैश्चविविधैर्भो
गैःप्रदानैर्वत्सरेणया॥२०॥प्रीतिर्मेक्रियते
सास्मिन्सकृत्सुचरितेश्रुते॥श्रुतंहरतिपापानि
तथारोग्यंप्रयछति॥२१॥रक्षांकरोतिभूतेभ्योज

नानाकीर्तनं मम ॥ पुष्टे प्रचारितं यत्नेंडुष्टदैत्यानिव
र्हणे ॥ २२ ॥ तस्मिन्स्थाने चौरकृतं भयं पुंसां न जायते ॥ पु
ष्पाभिस्ततपोयाग्म्य याम्यप्रसर्पैर्भिः कृता ॥ २३ ॥ वृ
श्चिकाश्चकृता स्ता स्तप्रयछंति भ्रमो मतिः ॥ अरण्ये प्रां
तरे वापि दावाग्निपरिवारितः ॥ २४ ॥ दस्युभिर्वावृतः
शून्ये गृहीतो वा पिशाचैर्भिः ॥ सिंहव्याघ्रानुजातो वा
वने वा वनहस्तिभिः ॥ २५ ॥ राज्ञा क्रुद्धेन चाज्ञप्तो वध्ये
वंधगतोपि वा ॥ आघूर्णितो वा वातेनास्थितः पोते
महार्णवे ॥ २६ ॥ पतत्सु चापि शस्त्रेषु संग्रामे भृश

५·
पर्द

दारुणे॥ सर्वाबाधासु घोरासु वेदनाभ्यर्दितोपि वा॥ स्म
रन् ममैतच्चरितं नरो मुच्येत संकटात्॥ मम प्रभावा
त्सिंहाद्या दस्यवो वैरिणस्तथा॥ २८॥ दूरादेव पलायं
ते स्मरतश्चरितं मम॥ ऋषिरुवाच॥ इत्युक्त्वा सा भग
वती चंडिका चंडविक्रमा॥ २९॥ पश्यतामेव देवानां
तत्रैवांतरधीयत॥ तेपि देवा निरातंकाः स्वाधिका
रान्यथापुरा॥ ३०॥ यज्ञभागभुजः सर्वे चक्रुर्विनिह
तारयः॥ दैत्याश्च देव्या निहते शुंभे देवरिपौ युधि
॥ ३१॥ जगद्विध्वंसिनि तस्मिन्महोग्रेतुलविक्रमे॥ नि

पर्द

॥

ंमेचमहावीर्यैःशोभापातालमापपुः ॥३२॥ एवंभग
वतीदेवीसानित्यापिपुनःपुनः ॥ संभूयकुरुतेभूप
जगतःपरिपालनं ॥३३॥ तयैतन्मोह्यतेविश्वंसैव
विश्वंप्रसूयते ॥ सायाचिताचविज्ञानंतुष्टाऋद्धिंप्र
यच्छति ॥३४॥ व्याप्तंतयैतत्सकलंब्रह्मांडंमनुजेश्व
र ॥ महाकाल्यामहाकालेमहामारीस्वरूपया ॥३५
सैवकालेमहामारीसैवसृष्टिर्भवत्यजा ॥ स्थितिं
करोतिभूतानांसैवकालेसनातनी ॥३६॥ भवकाले
नृणांसैवलक्ष्मीर्वृद्धिप्रदागृहे ॥ सैवाभावेतथाल

दु
६०

स्मा विनाशायोपजायते ॥ ३७ ॥ स्तुतासंपूजितापुष्पै
र्धूपगंधादिभिस्तथा ॥ ददातिवित्तंपुत्रांश्चमतिंधर्मे
तथाशुभां ॥ ३८ ॥ इतिश्रीमार्कंडेयपुराणेसावर्णिकेम
न्वंतरेदेवीमाहात्म्येदेव्यावरप्रदानोनाम ॥ १२ ॥ ऋषि
रुवाच ॥ एततेकथितंभूपदेवीमाहात्म्यमुत्तमं
एवंप्रभावासादेवीययेदंधार्यतेजगत ॥ १ ॥ विद्या
तथैवक्रियतेभगवद्विष्णुमायया ॥ तयात्वमेषवै
श्यस्तथैवान्येविवेकिनः ॥ २ ॥ मोह्यंतेमोहिताश्चै
वमोहमेष्यंतिचापरे ॥ तामुपैहिमहाराजशरणंप ६०

रमेश्वरी ॥ ३ ॥ आराधितासैवनृणांभोगस्वर्गापवर्ग
दा ॥ मार्कंडेयउवाच ॥ इतितस्यवचःश्रुत्वासुरथःस
नराधिपः ॥ ४ ॥ प्रणिपत्यमहाभागंतमृषिंशंसित
व्रतं ॥ निर्विण्णोतिममत्वेनराज्यापहरणेनच ॥ ५ ॥ ज
गामसद्यस्तपसेसचवैश्योमहामुने ॥ संदर्शनार्थ
मंबायानदीपुलिनसंस्थितः ॥ ६ ॥ सचवैश्यस्तपस्ते
पेदेवीसूक्तंपरंजपन् ॥ तौतस्मिन्पुलिनेदेव्याःकृत्वा
मूर्तिंमहीमयीं ॥ ७ ॥ अर्हणांचक्रतुस्तस्याःपुष्पधू
पाग्नितर्पणैः ॥ निराहारौयताहारौतन्मनस्कौसमा

हितौ ॥ ८ ॥ ददतस्तौ वलिं चैव निजगात्रासृगुक्षितं ॥ ए
वं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनो ॥ ९ ॥ परितुष्टा
जगद्धात्री प्रत्यक्षं प्राह चंडिका ॥ देव्युवाच ॥ यत्प्रार्थ्यते
त्वया भूप त्वया च कुलनंदन ॥ १० ॥ मत्तस्तत्प्राप्यतां स
र्वं परितुष्टा ददामि तत ॥ मार्कंडेय उवाच ॥ ततो वव्रे
नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥ ११ ॥ अत्रैव च निजं
राज्यं हतशत्रुवलं वलात ॥ सोपि वैश्यस्ततो ज्ञानं व
व्रे निर्विण्णमानसः ॥ १२ ॥ ममेत्यहमिति प्राज्ञः संगवि
च्युतिकारकं ॥ देव्युवाच ॥ स्वल्पैरहोभिर्नृपते स्वं रा

जेप्रपसतेमवार १२ हत्वारिपुनस्तवलितंतवत्त्रमविष्यति मज
प्यमृ्यः संप्राप्यजन्मदेवाद्विवत्ततः १४ सावर्णिकोनाममनुर्भ
वानभुविभविष्यति वेश्यवर्यत्वयायस्त्ववरोस्मत्तोमिवांछितं
१५ तंप्रयच्छामिसंसिध्येतवज्ञानंभविष्यति मार्कंडेयउवाच इति
दत्वातयोर्देवीयथामिलषितंवर १६ बभूवांतर्हितासद्योभक्त्या
ताभ्यामभिष्टता एवंदेव्यावरंलब्धासुरथः क्षत्रियर्षभः सूर्याज
न्मसमासाद्यसावर्णिर्भविताममु १७ इतिश्रीमार्कंडेयपुराणेसा
वर्णिकेमन्वंतरेदेवीमहात्म्येसुरथवैश्ययवरप्रदानोनामत्रयो
दशोध्यायः १३ ॐ अस्यश्रीदेवीसप्तशतीमालामंत्रस्यमार्कंडेयमेधर्षी
सौ अनुष्टुप्छंदः श्रीमहालक्ष्मीमहासरस्वतीमहाकालीदेव
ता गायत्र्यादिछंदांसि विजयाघावीजबंकुवीजप्रणववाग्भव

र्क्लिं रमाकामराजबीजानि ॐ ऐं ह्रीं श्रीं क्लीं प्राणाः जपजप इति
कीलकं मम सकलकामनासिद्ध्यर्थं देवीसूक्तमंत्रजपे विनियो
गः श्रीदेव्यै नमः ॐ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत वि
श्वदेवैः अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा
१ अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगं अहं द
धामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते २ अहं राष्ट्री
संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानां तां मा देवा व्य
दधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयंती ३ मया सो अन्नम
त्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तं अमंतवो मां त उप
क्षियंति श्रुधि श्रुत श्रद्धिवं ते वदामि ४ अहमेव स्वयमिदं व
दामि जुष्टं देवेभिरुत मानुषेभिः यं कामये तं तमुग्रं कृणोमि ६२

तंब्रह्माणंतमृषिंतंसुमेधां ५ अहंरुद्रायधनुरातनोमिब्रह्म
द्विषेसर्वेहंतवाउ अहंजनायसमदंकृणोम्यहंद्यावापृथिवी
आविवेश ६ अहंसुवेपितरमस्यमूर्धन्ममयोनिरप्स्वंतः
समुद्रे ततोवितिष्ठेभुवनानुविश्वोतामूंद्यांवर्ष्मणोपस्पृशामि
७ अहमेववातइवप्रवाम्यारभमाणाभुवनानिविश्वा परोदि
वापरएनापृथिव्यैतावतीमहिमासंबभूव ८ इतिऋग्वे
देदेवीसूक्तं ॐअस्यश्रीदेवीसूक्तस्यवागांभृणिऋषिरात्मादेवता
त्रिष्टुप्छंदःसप्तसतीसांगतासिध्यर्थंजपेविनियोगः ॐनमःश्रीचं
डिकायै ॐरात्रीव्यख्यदायतीपुरुत्रादेव्यक्षभिःविश्वाअधिश्रि
योधित १ ओर्वप्राअमर्त्यानिवतोदेव्युद्वतःज्योतिषाबाधते

तमः २ निरुस्वसारमस्कृतोषसंदेव्यायतीअपेदुहासतेतमः
३ सानोअद्ययस्यावयंनितेयामन्नविक्ष्महिवृक्षेनवसतिंवयः ४
निग्रामासोअविक्षतनिपद्वंतोनिपक्षिणः निश्येनासश्चिदर्थि
नः ५ यावयावृक्यंवृकंयवयस्तेनमूर्म्येअथानःसुतरा
भव ६ उपमापेपिशत्तमःकृष्णंव्यक्तमस्थित उषऋणेव
यातय ७ उपतेगाइवाकरंवृणीष्वदुहितर्दिवःरात्रिस्तोमंन
जिग्युषे ८ इतिरात्रिसूक्तंसमाप्तम् ॥ ॥ ॥

[illegible]

[illegible]

